| *Ind.* | *Ttp.* -ta, *Ac. sg. n.* | -man, *Ac. sg.* | -va, *N. sg.* | pad *with* prati, 3 *sg. Pres. Âtm.* | |
| thus | the by himself-done | action | man | obtains. | |

काकतालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः ।

| | | | | | |
|---|---|---|---|---|---|
| kâka-tâlîya-vat | pra-âptam | drishtvâ | api | ni-dhim | agra-tas |
| *Ind.* | âp *with* pra, *Ac. sg. m. past Ptc. Pass.* | dris, *Ger.* | *Ind.* | -dhi, *Ac. sg.* | -ra *with Ab. aff.* tas |
| As-in (the story of) the Crow-and the Palmfruit, | reached | having seen | even | a treasure | in front, |

न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥ ३५ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| na | svayam | daivam | â-datte | purusha-artham | apa-îkshate. | (35) |
| *Ind.* | *Ind.* | -va, *N. sg.* | dâ *with* â, 3 *sg. Pres. Âtm.* | *Ttp.* -tha, *Ac. sg.* | îksh *with* apa, 3 *sg. Pres. Âtm.* | |
| not | of itself | fate | takes (it) up, | man's-exertion | it expects. | |

उद्यमेन हि सिध्यंति कार्याणि न मनोरथैः ।

| | | | | | |
|---|---|---|---|---|---|
| ud-yamena | hi | sidhyanti | kâryâni | na | manas-rathais |
| -ma, *I. sg.* | *Ind.* | sidh, 3 *pl. Pres. Par.* | -ya, *N. pl.* | *Ind.* | *Ttp.* -tha, *I. pl.* |
| Through exertion | indeed | succeed | works, | not | through wishes, |

न हि सुप्तस्य सिंहस्य प्रविशंति मुखे मृगाः ॥ ३६ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| na | hi | suptasya | siṁhasya | pra-viśanti | mukhe | mrigâs. | (36) |
| *Ind.* | *Ind.* | svap, *G. sg. m. past. Ptc. Pass.* | -ha, *G. sg.* | viś *with* pra, 3 *pl. Pres. Par.* | -kha, *L. sg.* | -ga, *N. pl.* | |
| not | indeed | of the sleeping | lion | enter | into the mouth | the deer. | |

मातृपितृकृताभ्यासो गुणितामेति बालकः ।

| | | | |
|---|---|---|---|
| mâtri-pitri-krita-abhyâsas | gunitâm | eti | bâlakas |
| *Bahuv.* -sa, *N. sg. m.* | -tâ, *Ac. sg.* | i, 3 *sg. Pres. Par.* | -ka, *N. sg.* |
| By mother-and father-made-to study | to the state of a virtuous man | comes | a child, |

न गर्भच्युतिमात्रेण पुत्रो भवति पंडितः ॥ ३७ ॥

| | | | | | |
|---|---|---|---|---|---|
| na | garbha-chyuti-mâtrena | putras | bhavati | panditas. | (37) |
| *Ind.* | *Ttp.* -ra, *I. sg.* | -ra, *N. sg.* | bhû, 3 *sg. Pres. Par.* | -ta, *N. sg. m.* | |
| not | by birth-alone | a son | becomes | learned. | |

माता शत्रुः पिता वैरी येन बालो न पाठितः ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| mâtâ | śatrus | pitâ | vairî | yena | bâlas | na | pâthitas |
| -tri, *N. sg.* | -ru, *N. sg.* | -tri, *N. sg.* | -rin, *N. sg. m.* | yad, *I. sg. m.* | -la, *N. sg.* | *Ind.* | path, *N. sg. m. past Ptc. Pass. Caus.* |
| The mother | an enemy, | the father | hostile, | by whom | a boy | not | made to study, |

न शोभते सभामध्ये हंसमध्ये बको यथा ॥ ३८ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| na | śobhate | sabhâ-madhye | haṁsa-madhye | vakas | yathâ. | (38) |
| *Ind.* | śubh, 3 *sg. Pres. Âtm.* | *Ttp.* -ya, *L. sg.* | *Ttp.* -ya, *L. sg.* | -ka, *N. sg.* | *Ind.* | |
| not | does he shine | in an assembly-midst, | in the flamingo-midst | a crane | like. | |

रूपयौवनसंपन्ना विशालकुलसंभवाः ।

| | |
|---|---|
| rûpa-yauvana-sampannâs | viśâla-kula-sambhavâs |
| *Ttp.* -na, *N. pl. m.* (*rt.* pad *with* sam, *past Ptc. Pass.*) | *Bahuv.* -va, *N. pl. m.* |
| Beauty-youth-endowed | of noble-race-sprung |

विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ३९ ॥

| | | | | | |
|---|---|---|---|---|---|
| vidyâ-hînâs | na | śobhante | nis-gandhâs | iva | kiṁśukâs. (39) |
| *Ttp.* -na, *N. pl. m.* (*rt.* hâ) | *Ind.* | śubh, 3 *pl. Pres. Âtm.* | *Bahuv.* -dha, *N. pl. m.* | *Ind.* | -ka, *N. pl.* |
| knowledge-destitute ones | not | shine, | scent-less | like | kiṁśuka flowers. |

मूर्खोऽपि शोभते तावत्सभायां वस्त्रवेष्टितः ।

| | | | | | |
|---|---|---|---|---|---|
| mûrkhas | api | śobhate | tâvat | sabhâyâm | vastra-veshṭitas |
| -kha, *N. sg. m.* | *Ind.* | śubh, 3 *sg. Pres. Âtm.* | -vat, *Ac. sg. n. Adv.* | -bhâ, *L. sg.* | *Ttp.* -ta, *N. sg. m.* (*rt.* veshṭ). |
| A fool | also | shines | so long | in an assembly | garment-dressed, |

तावच्च शोभते मूर्खो यावत्किंचिन्न भाषते ॥ ४० ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| tâvat | cha | śobhate | mûrkhas | yâvat | kim - chid | na | bhâshate. (40) |
| -vat, *Ac. sg. n. Adv.* | *Ind.* | śubh. 3 *sg. Pres. Âtm.* | -kha, *N. sg. m.* | -vat, *Ac. sg. n. Adv.* | kim, *Ac. sg. n.* *Ind.* | *Ind.* | bhâsh, 3 *sg. Pres. Âtm.* |
| So long | and | shines | a fool | as long as | anything | not | he says. |

एतच्चिंतयित्वा स राजा पंडितसभां कारितवान् ।

| | | | | | |
|---|---|---|---|---|---|
| etad | chintayitvâ | sas | râjâ | paṇḍita-sabhâm | kâritavân. |
| etad, *Ac. sg. n.* | chint, *Ger.* | tad, *N. sg. m.* | -jan, *N. sg. m.* | *Ttp.* -bhâ, *Ac. sg.* | kṛi, *N. sg. m. past Ptc. Par. Caus.* |
| This | having thought | that | King | a wise men-assembly | caused to be made. |

राजोवाच । भो भोः पंडिताः श्रूयतां । अस्ति

| | | | | | | |
|---|---|---|---|---|---|---|
| râjâ | uvâcha: | bho | bhos | paṇḍitâs, | śrûyatâm; | asti |
| -jan, *N. sg.* | vach, 3 *sg. Perf. Par.* | *Ind.* | *Ind.* | -ta, *V. pl. m.* | śru, 3 *sg. Imp. Pass.* | as, 3 *sg. Pres. Par.* |
| The King | said: | O | ye | wise, | be it heard; | Is there |

कश्चिदेवंभूतो विद्वान्यो मम पुत्राणां नित्यमु-

| | | | | | | |
|---|---|---|---|---|---|---|
| kas-chid | evam-bhûtas | vidvân | yas | mama | putrâṇâm | nityam |
| kim, *N. sg. m.*, *Ind.* | *Karm.* -ta, *N. sg. m.* | -vas, *N. sg. m.* | yad, *N. sg. m.* | asmad, *G. sg.* | -ra, *G. pl.* | *Ind.* |
| any one | such a | sage, | who | of me | of the sons | constantly |

न्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म

| | | | | |
|---|---|---|---|---|
| unmârga-gâminâm | an-adhigata-śâstrâṇâm | idânîm | nîti-śâstra-upadeśena | punar-janma |
| *Ttp.* -min, *G. pl. m.* | *Bahuv.* -ra, *G. pl. m.* | *Ind.* | *Ttp.* -śa, *I. sg.* | *Karm.* -man, *Ac. sg.* |
| wrong-ways-going, | who have not-read-books, | now | by behaviour-book-instruction | again-birth |

कारयितुं समर्थः ।

| | |
|---|---|
| kârayitum | sam-arthas? |
| kṛi, *Inf. Caus.* | -tha, *N. sg. m.* |
| to effect | (is) capable? |

यतः । काचः कांचनसंसर्गाद्धत्ते मारकतीं द्युतिं ।

| | | | | | |
|---|---|---|---|---|---|
| yatas, | kâchas | kâñchana-saṁsargât | dhatte | mârakatîm | dyutim |
| *Ind.* | -cha, *N. sg.* | *Ttp.* -ga, *Ab. sg.* | dhâ, 3 *sg. Pres. Âtm.* | -ta, *Ac. sg. f.* | -ti, *Ac. sg.* |
| For, | Glass | from gold-proximity | accepts | emerald | splendour; |

तथा सत्संनिधानेन मूर्खो याति प्रवीणतां ॥ ४१ ॥

| | | | | | |
|---|---|---|---|---|---|
| tathâ | sat-sannidhânena | mûrkhas | yâti | pravîṇatâm. | (41) |
| *Ind.* | *Ttp.* -na, *I. sg.* | -kha, *N. sg. m.* | yâ, 3 *sg. Pres. Par.* | -tâ, *Ac. sg.* | |
| thus | through the good-vicinity | a fool | goes | to cleverness. | |

उक्तं च । हीयते हि मतिस्तात हीनैः सह समागमात् ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| uktam | cha, | hîyate | hi | matis | tâta | hînais | saha | sam-â-gamât |
| vach, *N. sg. n. past Ptc. Pass.* | *Ind.* | hâ, 3 *sg. Pres. Pass.* | *Ind.* | -ti, *N. sg.* | -ta, *V. sg.* | hâ, *I. pl. m. past Ptc. Pass.* | *Ind. Prep.* | -ma, *Ab. sg.* |
| Said | and, | It is lowered | truly | the intelligence, | my dear, | low persons | with | through intercourse, |

समैश्च समतामेति विशिष्टैश्च विशिष्टतां ॥ ४२ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| samais | cha | samatâm | eti | vi-śishṭais | cha | viśishṭatâm. | (42) |
| -ma, *I. pl. m.* | *Ind.* | -tâ, *Ac. sg.* | i, 3 *sg. Pres. Par.* | -ta, *I. pl. m.* | *Ind.* | -tâ, *Ac. sg.* | |
| with equals | and | to equality | it goes, | with distinguished | and | to distinction. | |

अत्रांतरे विष्णुशर्मनामा महापंडितः सकलनीतिशास्त्रतत्त्वज्ञो

| | | | | |
|---|---|---|---|---|
| atra | antare | vishṇuśarman-nâmâ | mahâ-paṇḍitas | sakala-nîti-śâstra-tattva-jñas |
| *Ind.* | -ra, *L. sg.* | *Bahuv.* -man, *N. sg. m.* | *Karm.* -ta, *N. sg. m.* | *Ttp.* -jña, *N. sg. m.* |
| There | meanwhile | Vishṇuśarman-named | a great-scholar | of all-behaviour-books-the essence-knowing |

बृहस्पतिरिवाब्रवीत् । देव महाकुलसंभूता एते राजपुत्राः ।

| | | | | | | |
|---|---|---|---|---|---|---|
| bṛihas-patis | iva | abravît: | deva, | mahâ-kula-sambhûtâs | ete | râjan-putrâs; |
| *Ttp.* -ti, *N. sg.* | *Ind.* | brû, 3 *sg. Impf. Par.* | -va, *V. sg.* | *Ttp.* -ta, *N. pl. m.* | etad, *N. pl. m.* | *Ttp.* -ra, *N. pl.* |
| Bṛihaspati | like | spoke: | Sire, | from a great-family-sprung | these | king's-sons; |

तन्मया नीतिं ग्राहयितुं शक्यंते ।

| | | | | |
|---|---|---|---|---|
| tad | mayâ | nîtim | grâhayitum | śakyante. |
| *Ind.* | asmad, *I. sg.* | -ti, *Ac. sg.* | grah, *Inf. Caus.* | śak, 3 *pl. Pres. Pass.* |
| therefore | by me | behaviour | to accept | they can be made. |

यतः । नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत् ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatas, | na | a-dravye | ni-hitâ | kâ-chid | kriyâ | phalavatî | bhavet |
| *Ind.* | *Ind.* | *Karm.* -ya, *L. sg.* | dhâ *with* ni, *N. sg. f. past Ptc. Pass.* | kim, *N. Ind. sg. f.* | -yâ, *N. sg.* | -vat, *N. sg. f.* | bhû, 3 *sg. Pot. Par.* |
| For, | Not | on a worthless-object | bestowed | any | labour | fruitful | can be, |

न व्यापारशतेनापि शुकवत्पाठ्यते वकः ॥ ४३ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| na | vyâpâra-śatena | api | śuka-vat | pâṭhyate | vakas | (43) |
| *Ind.* | *Ttp.* -ta, *I. sg.* | *Ind.* | *Ind.* | paṭh, 3 *sg. Pres. Pass. Caus.* | -ka, *N. sg.* | |
| not | by a hundred of exertions | even | parrot-like | is made to talk | a crane. | |

अन्यच्च । अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| anyad | cha, | asmin | tu | nis-guṇam | gotre | na | apatyam | upa-jâyate |
| -ya, *N. sg. n.* | *Ind.* | idam, *L. sg. n.* | *Ind.* | *Bahuv.* -na, *N. sg. n.* | -ra, *L. sg.* | *Ind.* | -ya, *N. sg.* | jan *with* upa, 3. *sg. Pres. Pass.* |
| Again | and, | In this | but | void-of virtue | family | not | offspring | is born, |

आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥ ४४ ॥

| | | | | | |
|---|---|---|---|---|---|
| â-kare | padma-râgâṇâm | janma | kâcha-maṇes | kutas. | (44) |
| -ra, *L. sg.* | *Bahuv.* -ga, *G. pl.* | -man, *N. sg.* | *Karm.* -ṇi, *G. sg.* | *Ind.* | |
| In a mine | of rubies | the production | of crystal | whence? | |

अतो ऽहं षण्मासाभ्यंतरे तव पुत्रान्नीतिशास्त्राभिज्ञान्करिष्यामि ।

| | | | | | | |
|---|---|---|---|---|---|---|
| atas | aham | shash-mâsa-abhyantare | tava | putrân | nîti-śâstra-abhijñân | karishyâmi. |
| *Ind.* | asmad, *N. sg.* | *Ttp.* -ra, *L. sg.* | yushmad, *G. sg.* | -ra, *Ac. pl.* | *Ttp.* -jña, *Ac. pl. m.* | kri, 1 *sg. Fut. Par.* |
| Therefore | I | in a six-months-interval | of thee | the sons | behaviour-book-knowing | will make. |

राजा सविनयं पुनरुवाच ।

| | | | |
|---|---|---|---|
| râjâ | sa-vinayam | punar | uvâcha: |
| -jan, *N. sg.* | *Avyay.* | *Ind.* | vach, 3 *sg. Perf. Par.* |
| The king | graciously | again | spoke: |

कीटो ऽपि सुमनःसंगादारोहति सतां शिरः ।

| | | | | | |
|---|---|---|---|---|---|
| Kîṭas | api | sumanas-saṅgât | â-rohati | satâm | śiras |
| -ṭa, *N. sg.* | *Ind.* | *Ttp.* -ga, *Ab. sg.* | ruh *with* â, 3 *sg. Pres. Par.* | -t, *G. pl.* | -ras, *Ac. sg.* |
| A worm | even | through flower-attachment | ascends | of the noble | the head, |

अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ४५ ॥

| | | | | | |
|---|---|---|---|---|---|
| aśmâ | api | yâti | devatvam | mahadbhis | su-pratishṭhitas. (45) |
| -man, *N. sg.* | *Ind.* | yâ, 3 *sg. Pres. Par.* | -tva, *Ac. sg.* | -hat, *I. pl. m.* | *Karm.* -ta, *N. sg. m.* (*rt.* sthâ) |
| a stone | even | goes | to divinity | by the great | well-set up. |

अन्यच्च । यथोदयगिरेर्द्रव्यं संनिकर्षेण दीप्यते ।

| | | | | | | |
|---|---|---|---|---|---|---|
| anyad | cha, | yathâ | udaya-gires | dravyam | sam-ni-karshena | dîpyate |
| -ya, *N. sg. n* | *Ind.* | *Ind.* | *Ttp.* -ri, *L. sg.* | -ya, *N. sg.* | -sha, *I. sg.* | dîp, 3 *sg. Pres. Âtm.* |
| Again | and, | As | of the sunrise-mountain | a thing | through the proximity | shines, |

तथा सत्संनिधानेन हीनवर्णो ऽपि दीप्यते ॥ ४६ ॥

| | | | | |
|---|---|---|---|---|
| tathâ | sat-sannidhânena | hîna-varṇas | api | dîpyate. 46 |
| *Ind.* | *Ttp.* -na, *I. sg.* | *Bahuv.* -na, *N. sg. m.* | *Ind.* | dîp, 3 *sg. Pres. Âtm.* |
| thus | through the noble-vicinity | one of low-caste | even | shines. |

गुणा गुणज्ञेषु गुणा भवंति

| | | | |
|---|---|---|---|
| guṇâs | guṇa-jñeshu | guṇâs | bhavanti |
| -ṇa, *N. pl.* | *Ttp.* -jña, *L. pl. m.* | -ṇa, *N. pl.* | bhû, 3 *pl. Pres. Par.* |
| Virtues | in virtue-knowers | virtues | are, |

ते निर्गुणं प्राप्य भवंति दोषाः ।

| | | | | |
|---|---|---|---|---|
| te | nis-guṇam | pra-âpya | bhavanti | doshâs; |
| tad, *N. pl. m.* | *Bahuv.* -ṇa, *Ac. sg. m.* | âp *with* pra, *Ger.* | bhû, 3 *pl. Pres. Par.* | -sha, *N. pl.* |
| they | to a virtue-void | having come | become | vices; |

आस्वाद्यतोयाः प्रभवंति नद्यः

| | | |
|---|---|---|
| âsvâdya-toyâs | pra-bhavanti | nadyas |
| *Bahuv.* -ya, *N. pl. f.* | bhû *with* pra, 3 *pl. Pres. Par.* | -dî, *N. pl.* |
| savoury-water holding | rise | rivers, |

समुद्रमासाद्य भवंत्यपेयाः ॥ ४७ ॥

| | | | |
|---|---|---|---|
| samudram | â-sâdya | bhavanti | a-peyâs (47) |
| -ra, *Ac. sg.* | sad *with* â, *Ger. Caus.* | bhû, 3 *pl. Pres. Par.* | *Karm.* -ya, *N. pl. f.* |
| the sea | having reached, | they are | undrinkable. |

तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणं ।

| | | | | | |
|---|---|---|---|---|---|
| tad | eteshâm | asmat-putrâṇâm | nîti-śâstra-upadeśâya | bhavantas | pra-mâṇam. |
| *Ind.* | etad, *G. pl. m.* | *Ttp.* -ra, *G. pl.* | *Ttp.* -śa, *D. sg.* | -vat, *N. pl. m.* | -ṇa, *N. sg.* |
| Therefore | of these | of us-the sons | for the behaviour-book-instruction | you | the authority. |

इत्युक्त्वा तस्य विष्णुशर्मणो बहुमानपुरःसरं पुत्रान्

| | | | | | |
|---|---|---|---|---|---|
| iti | uktvâ | tasya | vishṇu-śarmaṇas | bahumâna-puraḥsaram | putrân |
| *Ind.* | vach, *Ger.* | tad, *G. sg. m.* | -man, *G. sg.* | *Ind.* | -ra, *Ac. pl.* |
| Thus | having said | of that | Vishṇuśarman | by respect preceded | the sons |

समर्पितवान् । अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां

| | | | | |
|---|---|---|---|---|
| sam-arpitavân. | atha | prâsâda-pṛishṭhe | sukha-upavishṭânâm | râjan-putrâṇâm |
| ṛi, *with* sam, *N. sg. m. past. Ptc. Par.-Caus.* | *Ind.* | *Ttp.* -ṭha, *L. sg.* | *Karm.* -ṭa, *G. pl. m.* (*rt.* viś *with* upa). | *Tpt.* -ra, *G. pl.* |
| he made over. | Now | on the palace-terrace | of the comfortably-seated | king's-sons |

पुरस्तात्प्रस्तावक्रमेण स पण्डितोऽब्रवीत् ।

| | | | | |
|---|---|---|---|---|
| purastât | prastâva-kramena | sas | paṇḍitas | abravît: |
| *Ind.* | *Ttp.* -ma, *I. sg* | tad, *N. sg. m.* | -ta, *N. sg. m.* | brû, 3 *sg. Impf. Par.* |
| in front | of introduction-by way | that | learned man | said: |

काव्यशास्त्रविनोदेन कालो गच्छति धीमतां ।

| | | | |
|---|---|---|---|
| kâvya-śâstra-vinodena | kâlas | gachchhati | dhîmatâm |
| *Ttp.* -da, *I. sg.* | -la, *N. sg.* | gam, 3 *sg. Pres. Par.* | -mat, *G. pl. m.* |
| Through poem-book-entertainment | the time | passes away | of the wise, |

व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥ ४८ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| vyasanena | cha | mûrkhâṇâm | nidrayâ | kalahena | vâ. | (48) |
| -na. *I. sg.* | *Ind.* | -kha, *G. pl. m.* | -drâ, *I. sg.* | -ha, *I. sg.* | *Ind.* | |
| through vice | and | of fools, | through sleep, | through quarrel | or. | |

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां

| | | | | |
|---|---|---|---|---|
| tad | bhavatâm | vi-nodâya | kâka-kûrma-âdînâm | vichitrâm |
| *Ind.* | -vat, *G. pl. m.* | -da, *D. sg.* | *Bahuv.* -di, *G. pl. m.* | -tra, *Ac. sg. f.* |
| Therefore | of you | for the entertainment | of the crow-the tortoise-etc. | the wonderful |

कथां कथयामि । राजपुत्रैरुक्तं । आर्य कथ्यतां ।

| | | | | | |
|---|---|---|---|---|---|
| kathâm | kathayâmi. | râjan-putrais | uktam: | ârya | kathyatâm. |
| -thâ, *Ac. sg.* | kath, 1 *sg. Pres. Par.* | *Ttp.* -ra, *I. pl.* | vach, *N. sg. n. past Ptc. Pass.* | -ya, *V. sg.* | kath, 3 *sg. Imp. Pass* |
| story | I tell. | By the princes | said: | Reverend Sir, | it may be told. |

विष्णुशर्मोवाच । शृणुत । संप्रति मित्रलाभः प्रस्तूयते यस्या-

| | | | | | | |
|---|---|---|---|---|---|---|
| vishṇu-śarmâ | uvâcha: | śṛiṇuta; | samprati | mitra-lâbhas | pra-stûyate, | yasya |
| -man, *N. sg.* | vach, 3 *sg. Perf. Par.* | śru, 2 *pl. Imp. Par.* | *Ind.* | *Ttp.* -bha, *N. sg.* | stu *with* pra, 3 *sg. Pres. Pass.* | yad, *G. sg. m.* |
| Vishṇuśarman | said: | Listen; | now | the friend-acquisition | is introduced, | of which |

यमाद्यः श्लोकः ॥

| | | |
|---|---|---|
| ayam | âdyas | ślokas: |
| idam, *N. sg. m,* | -ya, *N. sg. m.* | -ka, *N. sg.* |
| this | the first | verse: |

## ॥ मित्रलाभः ॥

MITRA-LÂBHAS.

*Ttp.* -bha, *N. sg.*

FRIEND-ACQUISITION.

असाधना वित्तहीना बुद्धिमंतः सुहृत्तमाः ।

| | | | |
|---|---|---|---|
| a-sâdhanâs | vitta-hînâs | buddhimantas | suhṛittamâs |
| *Bahuv.* -na, *N. pl. m.* | *Ttp.* -na, *N. pl. m.* (*rt.* hâ). | -mat, *N. pl. m.* | su-hṛid, *N. pl. m. Superl.* |
| Having no-means, | of wealth-destitute, | the wise, | (if) very friendly, |

साधयंत्याशु कार्याणि काककूर्ममृगाखुवत् ॥ १ ॥

| | | | |
|---|---|---|---|
| sâdhayanti | âśu | kâryâṇi | kâka-kûrma-mṛiga-âkhu-vat. (1) |
| sâdh, 3 *pl. Pres. Par. Caus.* | *Ac. sg. n., Adv.* | -ya, *Ac. pl.* | *Dvandva, with aff.* vat, *Ind.* |
| accomplish | quickly | purposes | like-the crow-the tortoise-the deer-the mouse. |

राजपुत्रा ऊचुः । कथमेतत् । विष्णुशर्मा कथयति ।

| | | | | | |
|---|---|---|---|---|---|
| râjan-putrâs | ûchus: | katham | etad? | vishṇu-śarmâ | kathayati: |
| *Ttp.* -ra, *N. pl.* | vach, 3 *pl. Perf. Par.* | *Ind.* | etad, *N. sg. n.* | -man, *N. sg.* | kath, 3 *sg. Pres. Par.* |
| The princes | said: | 'How | that?' | Vishṇuśarman | relates: |

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र

| | | | | |
|---|---|---|---|---|
| asti | godâvarî-tîre | viśâlas | śâlmalî-tarus; | tatra |
| as, 3 *sg. Pres. Par.* | *Ttp.* -ra, *L. sg.* | -la, *N. sg. m.* | *Karm.* -ru, *N. sg.* | *Ind.* |
| There is | on the Godâvarî-bank | a large | silk cotton-tree; | thereon |

नानादिग्देशादागत्य रात्रौ पक्षिणो निवसंति । अथ

| | | | | | |
|---|---|---|---|---|---|
| nânâ-diś-deśât | â-gatya | râtrau | pakshiṇas | ni-vasanti. | atha |
| *Ttp.* -śa, *Ab. sg.* | gam *with* â, *Ger.* | -ri, *L. sg.* | -shin, *N. sg. m.* | vas *with* ni, 3 *pl. Pres. Par.* | *Ind.* |
| from various-region-country | having arrived | at night | birds | dwell. | Now |

कदाचिदवसन्नायां रात्रावस्ताचलचूडावलंबिनि भगवति

| | | | | |
|---|---|---|---|---|
| kadâ-chid | ava-sannâyâm | râtrau | astâchala-chûḍâ-avalambini | bhagavati |
| *Ind. Ind.* | sad *with* ava, *L. sg. f. past Ptc. Pass.* | -ri, *L. sg.* | *Ttp.* -bin, *L. sg. m.* | -vat, *L. sg. m.* |
| once, | being ended | the night, | while on setting-mountain-crest-resting | the venerable |

कुमुदिनीनायके चंद्रमसि लघुपतनकनामा वायसः प्रबुद्धः

| | | | | |
|---|---|---|---|---|
| kumudinî-nâyake | chandramasi | laghupatanaka-nâmâ | vâyasas | pra-buddhas |
| *Ttp.* -ka, *L. sg. m.* | -mas, *L. sg.* | *Bahuv.* -man, *N. sg. m.* | -sa, *N. sg.* | budh *with* pra, *N. sg. m. past Ptc. Pass.* |
| lotus-lover | the moon, | Laghupatanaka-named | a crow, | being awake, |

कृतांतमिव द्वितीयमायांतं व्याधमपश्यत्। तम-

| | | | | | | |
|---|---|---|---|---|---|---|
| kritântam | iva | dvitîyam | â-yântam | vyâdham | apaśyat. | tam |
| -ta, *Ac. sg.* | *Ind.* | -ya, *Ac. sg. m.* | yâ *with* â, *Ac. sg. m. Ptc. Pres. Par.* | -dha, *Ac. sg.* | driś, 3 *sg. Impf. Par.* | tad, *Ac. sg. m.* |
| Death | like | a second, | approaching | a hunter | saw. | Him |

वलोक्याचिंतयत्। अद्य प्रातरेवानिष्टदर्शनं

| | | | | | |
|---|---|---|---|---|---|
| ava-lokya | achintayat: | adya | prâtar | eva | anishṭa-darśanam |
| lok *with* ava, *Ger.* | chint, 3 *sg. Impf. Par.* | *Ind.* | *Ind.* | *Ind.* | *Ttp.* -na. *N. sg.* |
| having seen | he reflected: | To-day | early | indeed | of unwished-the sight |

जातं। न जाने किमनभिमतं दर्शयिष्यति।

| | | | | | |
|---|---|---|---|---|---|
| jâtam; | na | jâne | kim | an-abhimatam | darśayishyati |
| jan, *N. sg. n. past Ptc. Pass.* | *Ind.* | jñâ, 1 *sg. Pres. Âtm.* | *Ac. sg. n.* | *Karm.* -ta, *Ac. sg. n.* (*rt.* man *with* abhi) | driś, 3 *sg. Fut.* ii. *Par. Caus.* |
| produced; | not | do I know, | what | disagreeable | it will show. |

इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः।

| | | | | |
|---|---|---|---|---|
| iti | uktvâ | tad-anusaraṇa-krameṇa | vyâkulas | chalitas. |
| *Ind.* | vach, *Ger.* | *Ttp.*-ma, *I. sg.* | -la, *N. sg. m.* | chal, *N. sg. m. past Ptc. Pass.* |
| Thus | having said | by way-of following-him | perplexed | he moved about. |

यतः। शोकस्थानसहस्राणि भयस्थानशतानि च।

| | | | |
|---|---|---|---|
| yatas, | śoka-sthâna-sahasrâṇi | bhaya-sthâna-śatâni | cha |
| *Ind.* | *Ttp.* -ra, *N. pl.* | *Ttp.* -ta, *N. pl.* | *Ind.* |
| For, | Of sorrow-occasions-thousands, | of fear-occasions-hundreds | and |

दिवसे दिवसे मूढमाविशंति न पंडितं॥ २॥

| | | | | | |
|---|---|---|---|---|---|
| divase | divase | mûḍham | â-viśanti | na | paṇḍitam. (2) |
| -sa, *L. sg.* | -sa, *L. sg.* | muh, *Ac. sg. m. past Ptc. Pass.* | viś, *with* â, 3 *pl. Pres. Par.* | *Ind.* | -ta, *Ac. sg. m.* |
| by day | by day | the fool | approach, | not | the wise. |

अन्यच्च। विषयिणामिदमवश्यं कर्तव्यं।

| | | | | | |
|---|---|---|---|---|---|
| anyad | cha, | vishayiṇâm | idam | avaśyam | kartavyam. |
| -ya *N. sg. n.* | *Ind.* | -yin, *G. pl. m.* | idam, *N. sg. n.* | *Ind.* | kri, *N. sg. n. Ptc. Fut. Pass.* |
| Again | and; | Of men of the world | this | surely | to be done. |

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं।

| | | | | | |
|---|---|---|---|---|---|
| ud-sthâya | ud-sthâya | boddhavyam | mahat | bhayam | upa-sthitam, |
| sthâ *with* ud, *Ger.* | sthâ, *with* ud, *Ger.* | budh, *N. sg. n. Ptc. Fut. Pass.* | -t. *N. sg. n.* | -ya, *N. sg.* | sthâ, *with* upa, *N. sg. n. past Ptc. Pass.* |
| Having risen, | having risen, | it is to be thought, | great | danger | impending, |

मरणव्याधिशोकानां किमद्य निपतिष्यति॥ ३॥

| | | | |
|---|---|---|---|
| maraṇa-vyâdhi-śokânâm | kim | adya | ni-patishyati? (3) |
| *Dvandva.* -ka, *G. pl.* | kim, *N. sg. n.* | *Ind.* | pat, *with* ni, 3 *sg. Fut.* ii. *Par.* |
| of death-sickness-sorrow | which | to-day | will fall down? |

अथ तेन व्याधेन तंडुलकणान्विकीर्य जालं

| | | | | | |
|---|---|---|---|---|---|
| atha | tena | vyâdhena | taṇḍula-kaṇân | vi-kîrya | jâlam |
| *Ind.* | tad, *I. sg. m.* | -dha, *I. sg.* | *Ttp.* -na, *Ac. pl.* | kri, *with* vi, *Ger.* | -la, *N. sg.* |
| Then | by that | hunter | rice-grains | having scattered, | a net |

विस्तीर्णं । स च प्रच्छन्नो भूत्वा स्थितः ।

| | | | | | |
|---|---|---|---|---|---|
| vi-stîrṇam ; | sas | cha | pra-chhannas | bhûtvâ | sthitas. |
| strî, with vi, N. sg. n. past Ptc. Pass. | tad, N. sg. m. | Ind. | chhad, with pra, N. sg. m. past Ptc. Pass. | bhû, Ger. | sthâ, N. sg. m. past Ptc. Pass. |
| was spread ; | he | and | hidden | having been | stood. |

तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो

| | | | | | |
|---|---|---|---|---|---|
| tasmin | eva | kâle | chitragrîva-nâmâ | kapota-râjas | sa-parivâras |
| tad, L. sg. m. | Ind. | -la, L. sg. | Bahuv. -man, N. sg. m. | Ttp. -ja, N. sg. | Bahuv. -ra, N. sg. m. |
| At that | very | time | Chitragrîva-named | a pigeon-king | with-retinue |

वियति विसर्पंस्तांस्तंडुलकणानवलोकयामास । ततः

| | | | | | |
|---|---|---|---|---|---|
| viyati | vi-sarpan | tân | taṇḍula-kaṇân | ava-lokayâm-âsa. | tatas |
| -t, L. sg. | srip, with vi, N. sg. m. Ptc. Pres. Par. | tad, Ac. pl. m. | Ttp. -na, Ac. pl. | lok, with ava, 3 sg. Perf. Par. | Ind. |
| in the air | flying-about | those | rice-grains | espying-was. | Then |

कपोतराजस्तंडुलकणलुब्धान्कपोतान्प्रत्याह । कुतो ऽत्र

| | | | | | |
|---|---|---|---|---|---|
| kapota-râjas | taṇḍula-kaṇa-lubdhân | kapotân | prati-âha : | kutas | atra |
| Ttp. -ja. N. sg. | Ttp. -dha, Ac. pl. m. (rt. lubh) | -ta, Ac. pl. | ah, with prati, 3 sg. | Ind. | Ind. |
| the pigeon-king | the rice-grains desiring | pigeons | addressed : | Whence | here |

निर्जने वने तंडुलकणानां संभवः । तन्निरूप्यतां तावत् ।

| | | | | | | |
|---|---|---|---|---|---|---|
| nis-jane | vane | taṇḍula-kaṇânâm | sam-bhavas? | tad | ni-rûpyatâm | tâvat! |
| Bahuv. -na, L. sg. n. | -na, L. sg. | Ttp. -ṇa, G. pl. | -va, N. sg. | tad, N. sg. n. | rûp, with ni, 3 sg. Imp. Pass. | Ind. |
| in the lonely | wood | of rice-grains | the production? | That | may be investigated, | first! |

भद्रमिदं न पश्यामि । प्रायेणानेन तंडुलकणलोभेना-

| | | | | | | |
|---|---|---|---|---|---|---|
| bhadram | idam | na | paśyâmi. | prâyeṇa | anena | taṇḍula-kaṇa-lobhena |
| -ra, Ac. sg. n. | idam. Ac. sg. n. | Ind. | driś, 1 sg. Pres. Par. | -ya, I. sg. Adv. | idam, I. sg. m. | Ttp. -bha, I. sg. |
| Fortunate | this | not | I do consider. | Possibly | through this | rice-grain-desire |

स्माभिरपि तथा भवितव्यं ।

| | | | |
|---|---|---|---|
| asmâbhis | api | tathâ | bhavitavyam, |
| asmad, I. pl. | Ind. | Ind. | bhû, N. sg. n. Ptc. Fut. Pass. |
| by us | also | thus | to be fared, |

कंकणस्य तु लोभेन मग्नः पंके सुदुस्तरे ।

| | | | | | |
|---|---|---|---|---|---|
| kaṅkaṇasya | tu | lobhena | magnas | paṅke | su-dustare |
| -ṇa, G. sg. | Ind. | -bha, I. sg. | majj, N. sg. m. past Ptc. Pass. | -ka, L. sg. | Karm. -ra, L. sg. n. or m. |
| of gold | (but) | through desire | plunged | in a mire | very-difficult-to be crossed, |

वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥ ४ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| vriddha-vyâghreṇa | sam-pra-âptas | pathikas | sas | mritas | yathâ. | (4) |
| Karm. -ra, I. sg. | âp, with sam and pra, N. sg. m. past Ptc. Pass. | -ka, N. sg. | tad, N. sg. m. | mri. N. sg. m. past Ptc. Pass. | Ind. | |
| by an old-tiger | seized | wanderer | that | dead | as. | |

कपोता ऊचुः । कथमेतत् । सो ऽब्रवीत् ।

| | | | | | |
|---|---|---|---|---|---|
| kapotâs | ûchus : | katham | etad ? | sas | abravît : |
| -ta, N. sg. | vach, 3 pl. Perf. Par. | Ind. | etad, N. sg. n. | tad, N. sg. m. | brû, 3 sg. Impf. Par. |
| The pigeons | said : | how | that ? | He | said : |

अहमेकदा दक्षिणारण्ये चरन्नपश्यं। एको वृद्धव्याघ्रः स्नातः

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| aham | ekadâ | dakshiṇa-aranye | charan | apaśyam, | ekas | vṛiddha-vyâghras | snâtas |
| asmad, *N. sg.* | *Ind.* | *Karm.* -ya, *L. sg.* | char, *N. sg m. Pres. Ptc. Par.* | driś, 1 *sg. Impf. Par.* | eka, *N. sg. m.* | *Karm.* -ra, *N. sg.* | snâ, *N. sg. m. past Ptc. Pass.* |
| I | once | in the southern-wood | roaming | saw, | An | old-tiger | bathed |

कुशहस्तः सरस्तीरे ब्रूते। भो भोः पान्थ इदं

| | | | | | | |
|---|---|---|---|---|---|---|
| kuśa-hastas | saras-tîre | brûte: | bho | bhos | pântha, | idam |
| *Bahuv.* -ta, *N. sg. m.* | *Ttp.* -ra, *L. sg.* | brû, 3 *sg. Pres. Âtm.* | *Ind.* | *Ind.* | -tha, *V. sg.* | idam, *N. sg. n.* |
| with kuśa grass in his hand | on a lake-bank | says: | Ho, | ho, | wanderer, | this |

सुवर्णकंकणं गृह्यतां। ततो लोभाकृष्टेन केनचित्पान्थेना-

| | | | | | |
|---|---|---|---|---|---|
| suvarṇa-kaṅkaṇam | gṛihyatâm! | tatas | lobha-âkṛishṭena | kena-chid | pânthena |
| *Ttp.* -ṇa, *N. sg.* | grah, 3 *sg. Imp. Pass.* | *Ind.* | *Ttp.* -ta *I. sg. m.* (*rt.* krish *with* â) | kim, *Ind. I. sg. m.* | -tha, *I. sg.* |
| gold-bracelet | may be taken! | Then | by a desire-attracted | some | wanderer |

लोचितं। भाग्येनैतत्संभवति। किंत्वस्मिन्नात्मसंदेहे

| | | | | | | |
|---|---|---|---|---|---|---|
| â-lochitam: | bhâgyena | etad | sam-bhavati; | kim-tu | asmin | âtman-sandehe |
| loch *with* â, *N. sg. n. past Ptc. Pass.* | -ya, *I. sg.* | etad, *N. sg. n.* | bhû *with* sam, 3 *sg. Pres. Par.* | *Ind. Ind.* | idam, *L. sg. m.* | *Ttp.* -ha, *L. sg.* |
| it was considered: | luckily | this | happens; | but | in this | life-risk |

प्रवृत्तिर्न विधेया।

| | | |
|---|---|---|
| pra-vṛittis | na | vi-dheyâ; |
| -ti, *N. sg.* | *Ind.* | dhâ *with* vi, *N. sg. f. Ptc. Fut. Pass.* |
| engagement | not | to be made; |

यतः। अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatas, | an-ishṭât | ishṭa-lâbhe | api | na | gatis | jâyate | śubhâ, |
| *Ind.* | *Karm.* -ta, *Ab. sg.* (*rt.* ish). | *Ttp.* -bha, *L. sg.* | *Ind.* | *Ind.* | -ti, *N. sg.* | jan, 3 *sg. Pres. Âtm.* | -bha, *N. sg. f.* |
| For, | From an unpleasant one | on pleasure-reception | even | not | a result | is produced | prosperous, |

यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥ ५ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatra | âste | visha-saṁsargas | a-mṛitam | tad | api | mṛityave. | (5) |
| *Ind.* | âs, 3 *sg. Pres. Âtm.* | *Ttp.* -ga, *N. sg.* | *Bahuv.* -ta, *N. sg.* | tad, *N. sg. n.* | *Ind.* | -yu, *D. sg.* | |
| where | there lies | poison-mixture, | Ambrosia | that | even | for death. | |

किंतु सर्वत्रार्थार्जने प्रवृत्तिः संदेह एव।

| | | | | | |
|---|---|---|---|---|---|
| kim-tu | sarvatra | artha-arjane | pra-vṛittis | sam-dehas | eva. |
| *Ind. Ind.* | *Ind.* | *Ttp.* -na, *L. sg.* | -ti. *N. sg.* | -ha, *N. sg.* | *Ind.* |
| However | everywhere | in wealth acquisition | engaging | risk | certainly. |

तथा चोक्तं। न संशयमनारुह्य नरो भद्राणि पश्यति।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| tathâ | cha | uktam, | na | sam-śayam | an-âruhya | naras | bhadrâṇi | paśyati |
| *Ind.* | *Ind.* | vach, *N. sg. n. past Ptc. Pass.* | *Ind.* | -ya, *Ac. sg.* | an *before* ruh *with* â, *Ger.* | -ra, *N. sg.* | -ra, *Ac. pl. n.* | driś, 3 *sg. Pres. Par.* |
| Thus | and | said, | Not | risk | not-having encountered | a man | prosperity | beholds, |

संशयं पुनरारुह्य यदि जीवति पश्यति ॥ ६ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| sam-śayam | punar | â-ruhya | yadi | jîvati | paśyati. | (6) |
| -ya, *Ac. sg.* | *Ind.* | ruh *with* â, *Ger.* | *Ind.* | jîv, 3 *sg. Pres. Par.* | driś, 3 *sg. Pres. Par.* | |
| risk | on the contrary | having encountered, | if | he lives, | he sees (it). | |

तन्निरूपयामि तावत्। प्रकाशं ब्रूते। कुत्र तव कङ्कणं।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| tad | ni-rûpayâmi | tâvat. | pra-kâśam | brûte: | kutra | tava | kankanam? |
| tad, *Ac. sg. n.* | rûp *with* ni, 1 *sg. Pres. Par.* | *Ind.* | *Ind.* | brû, 3 *sg. Pres. Atm.* | *Ind.* | yushmad, *G. sg.* | -na, *N. sg.* |
| That | I investigate | then. | Aloud | he says: | Where | of thee | the bracelet? |

व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत्। कथं

| | | | | | | |
|---|---|---|---|---|---|---|
| vyâghras | hastam | pra-sârya | darśayati. | pânthas | avadat: | katham |
| -ra, *N. sg.* | -ta, *Ac. sg.* | sri *with* pra, *Ger. Caus.* | driś 3 *sg. Pres. Par. Caus.* | -tha, *N. sg.* | vad, 3 *sg. Impf. Par.* | *Ind.* |
| The tiger | the paw | having stretched-forth | shows. | The wanderer | said: | How |

मारात्मके त्वयि विश्वासः। व्याघ्र उवाच। शृणु रे पान्थ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| mâra-âtmake | tvayi | vi-śvâsas? | vyâghras | uvâcha: | śrinu | re | pântha! |
| *Bahuv.* -ka, *L. sg. m.* (âtman) | yushmad, *L. sg.* | -sa. *N. sg.* | -ra, *N. sg.* | vach, 3 *sg. Perf. Par.* | śru, 2 *sg. Imp. Par.* | *Ind.* | -tha, *V. sg.* |
| in the murder-minded | in thee | confidence? | The tiger | said: | Listen | O | wanderer! |

प्रागेव यौवनदशायामतिदुर्वृत्त आसं। अनेकगोमानुषाणां बधान्मे

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| prâk | eva | yauvana-daśâyâm | ati-durvrittas | âsam. | aneka-go-mânushânâm | badhât | me |
| prâch, *Ac. sg. n. Adv.* | *Ind.* | *Ttp.* -śâ, *L. sg.* | *Karm.* -tta, *N. sg. m.* | as, 1 *sg. Impf. Par.* | *Karm.* -sha, *G. pl.* | -dha, *Ab. sg.* | asmad, *G. sg.* |
| Formerly | indeed | in the youth-period | exceedingly-wicked | I was. | Of many-cows-(and)-men | because of the murder, | of me |

पुत्रा मृता दाराश्च वंशहीनश्चाहं। ततः केनचिद्धार्मिकेणा-

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| putrâs | mritâs | dârâs | cha | vamśa-hînas | cha | aham. | tatas | kena-chid | dhârmikena |
| -ra, *N. pl.* | mri, *N. pl. m. past Ptc. Pass.* | -ra, *N. pl.* | *Ind.* | *Ttp.* -na, *N. sg. m.* (hâ) | *Ind.* | asmad, *N. sg.* | *Ind.* | kim, *I. sg. m. Ind.* | -ka, *I. sg. m.* |
| the sons | dead, | wife | and, | family-deprived | and | I. | Then | by some | virtuous |

हमादिष्टः। दानधर्मादिकं चरतु भवान्। तदुपदेशादिदानीमहं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| aham | â-dishtas: | dâna-dharma-âdikam | charatu | bhavân. | tad-upadeśât | idânîm | aham |
| asmad, *N. sg.* | diś *with* â, *N. sg. m. past Ptc. Pass.* | *Bahuv.* -ka, *Ac. sg. n.* (âdi) | char, 3 *sg. Imp. Par.* | -vat, *N. sg. m.* | *Ttp.* -śa, *Ab. sg.* | *Ind.* | asmad, *N. sg.* |
| I | was advised: | Liberality-virtue, etc. | should practise | you. | Of him-because of the advice | now | I |

स्नानशीलो दाता वृद्धो गलितनखदन्तो न कथं विश्वासभूमिः।

| | | | | | | |
|---|---|---|---|---|---|---|
| snâna-śîlas | dâtâ | vriddhas | galita-nakha-dantas | na | katham | viśvâsa-bhûmis? |
| *Bahuv.* -la, *N. sg. m.* | -tri, *N. sg. m.* | -dha, *N. sg. m.* | *Bahuv.* -ta, *N. sg. m.* | *Ind.* | *Ind.* | *Ttp.* -mi, *N. sg.* |
| ablution-observing, | charitable, | old, | having lost-claws-(and)-teeth | not | how | a confidence-object? |

यतः। इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।

| | | | | | |
|---|---|---|---|---|---|
| yatas, | ijyâ-adhyayana-dânâni | tapas | satyam | dhritis | kshamâ |
| *Ind.* | *Dvandva.* -na, *N. pl.* | -as, *N. sg.* | -ya, *N. sg.* | -ti, *N. sg.* | -mâ, *N. sg.* |
| For, | Sacrificing-study-charity, | penance, | truth, | firmness, | forgiveness, |

अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥ ७॥

| | | | | | | |
|---|---|---|---|---|---|---|
| a-lobhas | iti | mârgas | ayam | dharmasya | ashtan-vidhas | smritas; (7) |
| *Karm.* -bha, *N. sg.* | *Ind.* | -ga, *N. sg.* | idam, *N. sg.* | -ma, *G. sg.* | *Bahuv.* -dha, *N. sg. m.* | smri, *N. sg. m. past Ptc. Pass.* |
| want-of desire, | thus | way | this | of virtue | the eight-fold | is recorded; |

तत्र पूर्वश्चतुर्वर्गो दंभार्थमपि सेव्यते ।

| | | | | | |
|---|---|---|---|---|---|
| tatra | pûrvas | chatur-vargas | dambha-artham | api | sevyate; |
| *Ind.* | -va, *N. sg. m.* | *Dvigu.* -ga, *N. sg. m.* | *Ind.* (-tha, *Ac. sg.*) | *Ind.* | sev, 3 *sg. Pres. Pass.* |
| There | the former | four-collection | for simulation's sake | also | is attended to; |

उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥ ८ ॥

| | | | | | |
|---|---|---|---|---|---|
| uttaras | tu | chatur-vargas | mahâ-âtmani | eva | tishṭhati (8) |
| -ra, *N. sg. m.* | *Ind.* | *Dvigu.* -ra, *N. sg.* | *Bahuv.* -man, *L. sg. m.* | *Ind.* | sthâ, 3 *sg. Pres. Par.* |
| the latter | but | four-collection | in the great-minded | only | stands. |

मम चैतावांल्लोभविरहो येन स्वहस्तस्थमपि सुवर्णकंकणं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| mama | cha | etâvân | lobha-virahas | yena | sva-hasta-stham | api | suvarṇa-kankaṇam |
| asmad, *G. sg.* | *Ind.* | -vat, *N. sg. m.* | *Ttp.* -ha, *N. sg.* | yad, *I. sg. n. Adv.* | *Ttp.* -stha, *Ac. sg. n.* | *Ind.* | *Ttp.* -ṇa, *Ac. sg.* |
| Of me | and | such | desire-freedom | that | in the own-hand-standing | even | the gold-bracelet |

यस्मै कस्मैचिद्दातुमिच्छामि । तथापि व्याघ्रो मानुषं खादती-

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| yasmai | kasmai-chid | dâtum | ichchhâmi. | tathâ | api | vyâghras | mânusham | khâdati |
| yad, *D. sg. m.* | kim, *D. sg. m.* | *Ind.* | dâ, *Inf.* | ish, 1 *sg. Pres. Par.* | *Ind.* | *Ind.* | -ra, *N. sg.* | -sha, *Ac. sg.* | khâd, 3 *sg. Pres. Par.* |
| to any-body | | to give | I wish. | So | even, | 'the tiger | the man | devours,' |

ति लोकप्रवादो दुर्निवारः ।

| | | |
|---|---|---|
| iti | loka-pravâdas | dus-nivâras. |
| *Ind.* | *Ttp.* -da, *N. sg.* | -ra, *N. sg. m.* |
| thus | the world-report | difficult-to be overcome. |

यतः । गतानुगतिको लोकः कुट्टनीमुपदेशिनीं ।

| | | | | |
|---|---|---|---|---|
| yatas, | gata-anugatikas | lokas | kuṭṭanîm | upa-deśinîm |
| *Ind.* | *Bahuv.* -ka, *N. sg. m.* | -ka, *N. sg.* | -nî, *Ac. sg.* | -śin, *Ac. sg. f.* |
| For, | The predecessor-following | world | a bawd | as instructress |

प्रमाणयति नो धर्मे यथा गोघ्नमपि द्विजं ॥ ९ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| pramâṇayati | nas | dharme | yathâ | go-ghnam | api | dvi-jam. (9) |
| pramâṇaya, 3 *sg. Pres. Par.* | asmad, *D. pl.* | -ma, *L. sg.* | *Ind.* | *Ttp.* -na, *Ac. sg. m.* | *Ind.* | -ja, *Ac. sg. m.* |
| holds up as a model | to us | in virtue, | as | a cow-killing | also | a twice-born. |

मया च धर्मशास्त्राण्यधीतानि । शृणु ।

| | | | | |
|---|---|---|---|---|
| mayâ | cha | dharma-śâstrâṇi | adhi-itâni. | śṛiṇu! |
| asmad, *I. sg.* | *Ind.* | *Ttp.* -ra, *N. pl.* | i *with* adhi, *N. pl. n. past Ptc. Pass.* | śru, 2. *sg. Imp. Par.* |
| By me | and | of religion-the books | read. | Listen; |

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा ।

| | | | | | |
|---|---|---|---|---|---|
| maru-sthalyâm | yathâ | vṛishṭis | kshudhâ-ârte | bhojanam | tathâ, |
| *Ttp.* -lî, *L. sg.* | *Ind.* | -ṭi, *N. sg.* | *Ttp.* -ta, *L. sg. m.* | -na, *N. sg.* | *Ind.* |
| In a desert-place | as | rain, | in the hunger-pained | food | thus, |

दरिद्रे दीयते दानं सफलं पांडुनंदन ॥ १० ॥

| | | | | |
|---|---|---|---|---|
| daridre | dîyate | dânam | sa-phalam | pâṇḍu-nandana. (10) |
| -ra, *L. sg. m.* | dâ, 3 *sg. Pres. Pass.* | -na, *N. sg.* | *Bahuv.* -la, *N. sg. n.* | *Ttp.* -na, *V. sg.* |
| Unto a poor | is given | a gift | fruitful, | O Pâṇḍu-son. |

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| prâṇâs | yathâ | âtmanas | abhi-ishṭâs | bhûtânâm | api | te | tathâ |
| -ṇa, *N. pl.* | *Ind.* | -man, *G. sg.* | ish *with* abhi, *N. pl. m. past Ptc. Pass.* | -ta, *G. pl. n.* | *Ind.* | tad, *N. pl. m.* | *Ind.* |
| Life | as | of oneself | dear, | of living beings | also | it | thus, |

आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ॥ ११ ॥

| | | | | | |
|---|---|---|---|---|---|
| âtman-aupamyena | bhûteshu | dayâm | kurvanti | sâdhavas. | (11) |
| *Ttp.* -ya, *I. sg.* | -ta, *L. pl. n.* | -yâ, *Acc. sg.* | kri, 3 *pl. Pres. Par.* | -dhu, *N. pl. m.* | |
| Through self-comparison | unto living beings | sympathy | bestow | the good. | |

अपरं च । प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| aparam | cha, | prati-â-khyâne | cha | dâne | cha | sukha-duḥkhe | priya-apriye |
| -ra, *N. sg. n.* | *Ind.* | -na, *L. sg.* | *Ind.* | -na, *L. sg.* | *Ind.* | *Dvandva.* -kha, *L. sg.* | *Dvandva.* -ya, *L. sg.* |
| Another | and, | In refusing | and, | in granting | and, | in pleasure-(and) pain, | in pleasing-(and) displeasing, |

आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥ १२ ॥

| | | | | |
|---|---|---|---|---|
| âtman-aupamyena | purushas | pra-mâṇam | adhi-gachchhati. | (12) |
| *Ttp.* -ya, *I. sg.* | -sha, *N. sg.* | -ṇa, *Ac. sg.* | gam *with* adhi, 3 *sg. Pres. Par.* | |
| through self-comparison | a man | a scale | obtains. | |

अन्यच्च । मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ।

| | | | | | |
|---|---|---|---|---|---|
| anyad | cha, | mâtṛi-vat | para-dâreshu | para-dravyeshu | loshṭa-vat |
| -ya, *N. sg. n.* | *Ind.* | *Ind.* | *Ttp.* -ra, *L. pl.* | *Ttp.* -ya, *L. pl.* | *Ind.* |
| Again | and, | As-on a mother | on another's-wife, | on another's-possessions | as-on a lump of earth, |

आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥ १३ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| âtman-vat | sarva-bhûteshu | yas | paśyati | sas | paṇḍitas. | (13) |
| *Ind.* | *Karm.* -ta, *L. pl. n.* | yad, *N. sg. m.* | driś 3 *sg. Pres. Par.* | tad, *N. sg. m.* | -ta, *N. sg. m.* | |
| as-on himself | on all-beings | who | looks, | he | wise. | |

त्वं चातीव दुर्गतस्तेन तत्तुभ्यं

| | | | | | | |
|---|---|---|---|---|---|---|
| tvam | cha | ati-iva | dus-gatas, | tena | tad | tubhyam |
| yushmad, *N. sg.* | *Ind.* | *Ind. Ind.* | *Karm.* -ta, *N. sg. m.* | tad, *I. sg. n. Adv.* | tad, *Ac. sg. n.* | yushmad, *D. sg.* |
| Thou | and | exceedingly | bad-circumstanced, | therefore | this | to thee |

दातुं सयत्नोऽहं । तथा चोक्तं ।

| | | | | | |
|---|---|---|---|---|---|
| dâtum | sa-yatnas | aham. | tathâ | cha | uktam. |
| dâ, *Inf.* | *Bahuv.* -na, *N. sg. m.* | asmad, *N. sg.* | *Ind.* | *Ind.* | vach, *N. sg. n. past Ptc. Pass.* |
| to give | endeavouring | I. | Thus | and | said, |

दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| daridrân | bhara | kaunteya | mâ | pra-yachchha | îśvare | dhanam, |
| -ra, *Ac. pl. m.* | bhri, 2 *sg. Imp. Par.* | -ya, *V. sg.* | *Ind.* | yam *with* pra, 2 *sg. Imp. Par.* | -ra, *L. sg.* | -na, *Ac. sg.* |
| The poor | support, | O son of Kuntî, | not | bestow | on a lord | wealth, |

व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥ १४ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| vyâdhitasya | aushadham | pathyam, | nis-rujasya | kim | aushadhais? | (14) |
| -ta, *G. sg. m.* | -dha, *N. sg.* | -ya, *N. sg. n.* | *Bahuv.* -ja, *G. sg. m.* | kim *Ac. sg. n.* | -dha, *I. pl.* | |
| Of the diseased | medicine | wholesome, | of the un-diseased | what | with drugs? | |

अन्यच्च । दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| anyad | cha, | dâtavyam | iti | yad | dânam | dîyate | an-upakâriṇe |
| -ya, *N.sg.n.* | *Ind.* | dâ, *N.sg.n. Ptc. Fut. Pass.* | *Ind.* | yad, *N.sg.n.* | -na, *N.sg.* | dâ, 3 *sg. Pres. Pass.* | *Karm.* -rin, *D.sg.m.* |
| Again | and, | 'It ought to be given,' | thus | what | gift | is given | to one not-conferring benefits, |

देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ॥ १५ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| deśe | kâle | cha | pâtre | cha | tad | dânam | sâttvikam | vidus. (15) |
| -śa, *L. sg.* | -la, *L. sg.* | *Ind.* | -tra, *L. sg.* | *Ind.* | -tad, *Ac. sg. n.* | -na, *Ac. sg.* | -ka, *Ac. sg. n.* | vid, 3 *pl. Perf. Par.* |
| In place, | in time | and, | unto a worthy person | and, | that | gift | a true one | they record. |

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण । ततो यावद्-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| tad | atra | sarasi | snâtvâ | suvarṇa-kankaṇam | grihâṇa. | tatas | yâvat |
| *Ind.* | *Ind.* | -ras, *L. sg.* | snâ, *Ger.* | *Ttp.* -ṇa, *Ac. sg.* | grah, 2 *sg. Imp. Âtm.* | *Ind.* | *Ind.* |
| Therefore | here | in the lake | having bathed | the gold-bracelet | accept. | Thereupon | while |

असौ तद्वचः प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्म-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| asau | tad-vachas | prati-itas | lobhât | saras | snâtum | pra-viśati, | tâvat |
| adas, *N. sg. m.* | *Ttp.* -chas, *Ac. sg.* | i *with* prati, *N. sg. m. past Ptc. Pass.* | -bha, *Ab. sg.* | -ras, *Ac. sg.* | snâ, *Inf.* | viś, *with* pra, 3 *sg. Pres. Par.* | *Ind.* |
| he | his word | trusting | through desire | the lake | to bathe | enters, | then |

हापङ्के निमग्नः पलायितुमक्षमः । पङ्के पतितं

| | | | | | |
|---|---|---|---|---|---|
| mahâ-panke | ni-magnas | palâyitum | a-kshamas. | panke | patitam |
| *Karm.* -ka, *L. sg.* | majj *with* ni, *N. sg. m. past. Ptc. Pass.* | ay *with* parâ, *Inf.* | *Karm.* -ma, *N. sg. m.* | -ka, *L. sg.* | pat, *Ac. sg. m. past Ptc. Pass.* |
| into the great-mire | plunged | to escape | unable. | Into the mire | the fallen |

दृष्ट्वा व्याघ्रोऽवदत् । अहह महापङ्के पतितोऽसि ।

| | | | | | | |
|---|---|---|---|---|---|---|
| drishṭvâ | vyâghras | avadat: | ahaha | mahâ-panke | patitas | asi; |
| driś, *Ger.* | -ra, *N. sg.* | vad, 3 *sg. Impf. Par.* | *Ind.* | *Karm.* -ka, *L. sg.* | pat, *N. sg. m. past Ptc. Pass.* | as, 2 *sg. Pres. Par.* |
| having seen | the tiger | said: | 'Ah, ah, | into the great-mire | fallen | thou art; |

अतस्त्वामहमुत्थापयामि । इत्युक्त्वा शनैः शनै-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| atas | tvâm | aham | ud-sthâpayâmi, | iti | uktvâ | śanais | śanais |
| *Ind.* | yushmad, *Ac. sg.* | asmad, *N. sg.* | sthâ *with* ud, 1 *sg. Pres Par. Caus.* | *Ind.* | vach, | *Ind.* | *Ind.* |
| thence | thee | I | lift out,' | thus | having said, | slowly | slowly |

रुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् ।

| | | | | | | |
|---|---|---|---|---|---|---|
| upa-gamya | tena | vyâghreṇa | dhritas | sas | pânthas | achintayat: |
| gam *with* upa, *Ger.* | tad, *I. sg. m.* | -ra, *I. sg.* | dhri, *N. sg. m. past Pass. Ptc.* | tad, *N. sg. m.* | -tha, *N. sg.* | chint, 3 *sg. Impf. Par.* |
| having approached, | by that | tiger | seized | that | wanderer | thought: |

न धर्मशास्त्रं पठतीति कारणं

| | | | | |
|---|---|---|---|---|
| na | dharma-śâstram | paṭhati | iti | kâraṇam, |
| *Ind.* | *Ttp.* -ra, *Ac. sg.* | paṭh, 3 *sg. Pres. Par.* | *Ind.* | -ṇa, *N. sg.* |
| Not | 'the law-book | he reads,' | thus is | a reason, |

न चापि वेदाध्ययनं दुरात्मनः ।

| | | | | |
|---|---|---|---|---|
| na | cha | api | veda-adhyayanam | dus-âtmanas |
| *Ind.* | *Ind.* | *Ind.* | *Ttp.* -na, *N. sg.* | *Bahuv.* -man, *G. sg. m.* |
| not | and | also | the Veda-study | of the wicked-minded, |

स्वभाव एवात्र तथातिरिच्यते

| | | | | |
|---|---|---|---|---|
| sva-bhâvas | eva | atra | tathâ | ati-richyate |
| *Karm.* -va, *N. sg.* | *Ind.* | *Ind.* | *Ind.* | rich *with* ati, 3 *sg. Pres. Pass.* |
| the inborn-disposition | only | here | thus | prevails, |

यथा प्रकृत्या मधुरं गवां पयः ॥ १६ ॥

| | | | | | |
|---|---|---|---|---|---|
| yathâ | pra-kṛityâ | madhuram | gavâm | payas. | (16) |
| *Ind.* | -ti, *I. sg.* | -ra, *N. sg. n.* | go, *G. pl.* | -yas, *N. sg.* | |
| as | by nature | sweet | of cows | the milk. | |

किंच। अवशेंद्रियचित्तानां हस्तिस्नानमिव क्रिया।

| | | | | |
|---|---|---|---|---|
| Kim-cha, | avaśa-indriya-chittânâm | hastin-snânam | iva | kriyâ, |
| *Ind. Ind.* | *Bahuv.* -tta, *G. pl. m.* | *Ttp.* -na. *N. sg.* | *Ind.* | -yâ, *N. sg.* |
| Moreover, | Of those with unsubdued senses-(and)-mind | elephant-bathing | like | the action, |

दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ १७ ॥

| | | | | | |
|---|---|---|---|---|---|
| durbhagâ-âbharaṇa-prâyas | jñânam | bhâras | kriyâm | vinâ. | (17) |
| *Bahuv.* -ya, *N. sg. m.* | -na, *N. sg.* | -ra, *N. sg.* | -yâ, *Ac. sg.* | *Ind.* | |
| Unhappy women's-ornaments-resembling | knowledge | a burthen | action | without. | |

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| tad | mayâ | bhadram | na | kṛitam | yad | atra | mâra-âtmake | vi-śvâsas | kṛitas. |
| tad, *N. sg. n.* | asmad, *I. sg.* | -ra, *N. sg. n.* | *Ind.* | kṛi, *N. sg. n. p. Pt. Pass.* | *Ind.* | *Ind.* | *Bahuv.* -ka, *L. sg. m.* (âtman). | -sa, *N. sg.* | kṛi, *N. sg. m. past Ptc. Pass.* |
| This | by me | prosperous | not | done, | that | here | in the murderous-minded | confidence | placed. |

तथा ह्युक्तं। नदीनां शस्त्रपाणीनां नखिनां शृंगिणां तथा।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| tathâ | hi | uktam, | nadînâm | śastra-pâṇînâm | nakhinâm | śṛiṅginâm | tathâ, |
| *Ind.* | *Ind.* | vach, *N. sg. n. past Ptc. Pass.* | -dî, *G. pl.* | *Bahuv.* -ṇi, *G. pl. m.* | -in, *G. pl. m.* | -in, *G. pl. m.* | *Ind.* |
| Thus | for | said, | Of rivers, | of the weapon-in hand having, | of the claw possessing, | of the horn possessing | thus, |

विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ १८ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| vi-śvâsas | na | eva | kartavyas | strîshu | râjan-kuleshu | cha. | (18) |
| -sa, *N. sg.* | *Ind.* | *Ind.* | kṛi, *N. sg. m. Ptc. Fut. Pass.* | -rî, *L. pl.* | *Ttp.* -la, *L. pl.* | *Ind.* | |
| confidence | not | by any means | to be made, | in women, | in kings' families | and. | |

अपरं च। सर्वस्य हि परीक्ष्यंते स्वभावा नेतरे गुणाः।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| aparam | cha, | sarvasya | hi | pari-îkshyante | sva-bhâvâs | na | itare | guṇâs; |
| -ra, *N. sg. n.* | *Ind.* | -va, *G. sg. m.* | *Ind.* | îksh *with* pari, 3. *pl. Pres. Pass.* | *Karm.* -va, *N. pl.* | *Ind.* | -ra, *N. pl. m.* | -ṇa, *N. pl.* |
| Another | and, | Of every one | indeed | are investigated | the natural-dispositions, | not | the other | qualities; |

अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते ॥ १९ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ati-itya | hi | guṇân | sarvân | sva-bhâvas | mûrdhni | vartate. | (19) |
| i *with* ati, *Ger.* | *Ind.* | -ṇa, *Ac. pl.* | -va, *Ac. pl. m.* | *Karm.* -va, *N. sg.* | -dhan, *L. sg.* | vṛit, 3. *sg. Pres. Âtm.* | |
| excelling | for | qualities | all | the natural-disposition | at the head | stands. | |

अन्यच्च। स हि गगणविहारी कल्मषध्वंसकारी

| | | | | | |
|---|---|---|---|---|---|
| anyad | cha, | sas | hi | gagaṇa-vihârî | kalmasha-dhvaṁsa-kârî |
| -ya, *N. sg. n.* | *Ind.* | tad, *N. sg. m.* | *Ind.* | *Ttp.* -rin, *N. sg. m.* | *Ttp.* -rin, *N. sg. m.* |
| Again | and, | This | indeed | in the sky-roaming | sin-destruction-causing |

दशशतकरधारी ज्योतिषां मध्यचारी ।

| | | |
|---|---|---|
| daśan-śata-kara-dhârî | jyotishâm | madhya-chârî |
| *Ttp.* -rin, *N. sg. m.* | -tis, *G. pl.* | *Ttp.* -rin, *N. sg. m.* |
| ten-hundred-rays-bearing | of the lights | in the midst-wandering |

विधुरपि विधियोगाद्ग्रस्यते राहुणासौ

| | | | | | |
|---|---|---|---|---|---|
| vidhus | api | vidhi-yogât | grasyate | râhuṇâ | asau; |
| -dhu, *N. sg.* | *Ind.* | *Ttp.* -ga, *Ab. sg.* | gras, 3 *sg. Pres. Pass.* | -hu, *I. sg.* | adas, *N. sg. m.* |
| the moon | even | through fate-conjuncture | is devoured | by Râhu | he; |

लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥ २० ॥

| | | | | | |
|---|---|---|---|---|---|
| likhitam | api | lalâṭe | pra-ujjhitum | kas | sam-arthas? (20) |
| likh, *Ac. sg. n. past Ptc. Pass.* | *Ind.* | -ṭa, *L. sg.* | ujjh *with* pra, *Inf.* | kim, *N. sg. m.* | -tha, *N. sg. m.* |
| what is written | even | on the forehead | to-escape | who | able? |

इति चिंतयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च । अतो

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| iti | chintayan | eva | asau | vyâghreṇa | vi-â-pâditas | khâditas | cha. | atas |
| *Ind.* | chint, *N. sg. m. Ptc. Pres. Par.* | *Ind.* | adas, *N. sg. m.* | -ra, *I. sg.* | pad *with* vi *and* â, *N. sg. m. past Ptc. Pass. Caus.* | khâd, *N. sg. m. past Ptc. Pass.* | *Ind.* | *Ind.* |
| Thus | reflecting | even | he | by the tiger | killed, | eaten | and. | Therefore |

ऽहं ब्रवीमि कंकणस्य तु लोभेनेत्यादि । अतः सर्वथाविचारितं

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| aham | bravîmi: | kaṅkaṇasya | tu | lobhena | iti-âdi. | atas | sarvathâ | a-vichâritam |
| asmad, *N. sg.* | brû, 1 *sg. Pres. Par.* | -ṇa, *G. sg.* | *Ind.* | -bha, *I. sg.* | *Ind.* | *Ind.* | *Ind.* | *Karm.* -ta, *N. sg. n.* (*rt.* char *with* vi) |
| I | say: | 'of gold | but | through desire, | etc.' | Therefore | anyhow | an inconsiderate |

कर्म न कर्तव्यं । यतः ।

| | | | |
|---|---|---|---|
| karma | na | kartavyam. | yatas, |
| -man, *N. sg.* | *Ind.* | kṛi, *N. sg. n. Ptc. Fut. Pass.* | *Ind.* |
| act | not | to be done. | For, |

सुजीर्णमन्नं सुविचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| su-jîrṇam | annam | su-vichakshaṇas | sutas | su-śâsitâ | strî | nṛi-patis | su-sevitas |
| *Karm.* -ṇa, *N. sg. n.* | -na, *N. sg.* | *Karm.* -ṇa, *N. sg. m.* | -ta, *N. sg.* | *Karm.* -ta, *N. sg. f.* | -rî, *N. sg.* | *Ttp.* -ti, *N. sg.* | *Karm.* -ta, *N. sg. m.* |
| Well-digested | food, | a well-discerning | son, | a well-governed | wife, | a prince | well-served, |

सुचिंत्य चोक्तं सुविचार्य यत्कृतं सुदीर्घकालेऽपि न

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| su-chintya | cha | uktam | su-vichârya | yad | kṛitam | su-dîrgha-kâle | api | na |
| chint, *with* su, *Ger.* | *Ind.* | vach, *N. sg. n. past Ptc. Pass.* | char *with* vi, *Ger. Caus.* | yad, *N. sg. n.* | kṛi, *N. sg. n. past Ptc. Pass.* | *Karm.* -la, *L. sg.* | *Ind.* | *Ind.* |
| Well-having reflected | and | spoken, | well-having considered | what | done, | in very-long-time | even | not |

याति विक्रियां ॥ २१ ॥

| | |
|---|---|
| yâti | vi-kriyâm. (21) |
| yâ, 3. *sg. Pres. Par.* | -yâ, *Ac. sg.* |
| goes | to change. |

एतद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह । आः किमेवमुच्यते ।

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| etad | vachanam | śrutvâ | kas - | chid | kapotas | sa-darpam | âha: | âḥ | kim | evam | uchyate? |
| etad, *Ac. sg. n.* | -na, *Ac. sg.* | śru, *Ger.* | kim, *N. sg. m.* | *Ind.* | -ta, *N. sg.* | *Avyay.* | ah, 3 *sg. Perf. Par.* | *Ind.* | *N. sg. n.* | *Ind.* | vach, 3 *sg. Pres. Pass.* |
| This | speech | having heard | some | | pigeon | haughtily | said: | Ha, | what | thus | is said? |

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
vriddhânâm vachanam grâhyam âpad-kâle hi upa-sthite,
-dha, *G. pl. m.* -na, *N. sg.* grah, *N. sg. n. Ptc. Fut. Pass.* *Ttp.* -la, *L. sg.* *Ind.* sthâ *with* upa, *L. sg. m. past Ptc. Pass.*
Of the old the word to be accepted misfortune-time for having approached,

सर्वत्रैव विचारेण भोजने न प्रवर्तते ॥ २२ ॥
sarvatra eva vi-chârena bhojane na pra-vartate. (22)
*Ind.* *Ind.* -ra, *I. sg.* -na, *L. sg.* *Ind.* vrit *with* pra, 3 *sg. Pres. Âtm.*
everywhere indeed with reflecting in eating not one engages.

यतः । शंकाभिः सर्वमाक्रांतमन्नं पानं च भूतले ।
yatas, śankâbhis sarvam â-krântam annam pânam cha bhû-tale,
*Ind.* -kâ, *I. pl.* -va, *N. sg. n.* kram *with* â, *N. sg. n. past Ptc. Pass.* -na, *N. sg.* -na, *N. sg.* *Ind.* *Ttp.* -la, *L. sg.*
For, By apprehensions everything assailed, food, drink and, on the earth-surface,

प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ॥ २३ ॥
pra-vrittis kutra kartavyâ jîvitavyam katham nu vâ? (23)
-tti, *N. sg.* *Ind.* kri, *N. sg. f. Ptc. Fut. Pass.* jîv, *N. sg. n. Ptc. Fut. Pass.* *Ind.* *Ind.* *Ind.*
occupation where to be made, to be lived how now or?

ईर्ष्यी घृणी त्वसंतुष्टः क्रोधनो नित्यशंकितः ।
îrshyî ghriṇî tu a-santushṭas krodhanas nitya-śankitas
-yin, *N. sg. m.* -ṇin, *N. sg. m.* *Ind.* *Karm.* -ta, *N. sg. m.* (*rt.* tush *with* sam) -na, *N. sg. m.* *Karm.* -ta, *N. sg. m.*
The envious, the censorious but, the dis-satisfied, the passionate, the constantly-suspicious,

परभाग्योपजीवी च षडेते दुःखभागिनः ॥ २४ ॥
para-bhâgya-upajîvî cha shaṭ ete duḥkha-bhâginas. (24)
*Ttp.* -vin, *N. sg. m.* *Ind.* shash, *N.* etad, *N. pl. m.* *Ttp.* -gin, *N. pl. m.*
the on another's-property-living and, six these misery-sharing.

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः ।
etad śrutvâ sarve kapotâs tatra upa-vishṭâs.
etad, *Ac. sg. n.* śru, *Ger.* -va, *N. pl. m.* -ta, *N. pl.* *Ind.* viś, *with* upa, *N. pl. m. past Ptc. Pass.*
This having heard all the pigeons there alighted.

यतः । सुमहांत्यपि शास्त्राणि धारयंतो बहुश्रुताः ।
yatas, su-mahânti api śâstrâṇi dhârayantas bahu-śrutâs
*Ind.* *Karm.* -hat, *Ac. pl. n.* *Ind.* -ra, *Ac. pl.* dhri, *N. pl. m. Ptc. Pres. Par. Caus.* *Bahuv.* -ta, *N. pl. m.* (*rt.* śru)
For, Very-great even sciences possessing, having learned-much,

छेत्तारः संशयानां च क्लिश्यंते लोभमोहिताः ॥ २५ ॥
chhettâras saṃ-śayânâm cha kliśyante lobha-mohitâs. (25)
-tri, *N. pl. m.* -ya, *G. pl.* *Ind.* kliś, 3 *pl. Pres. Âtm.* *Ttp.* -ta, *N. pl. m.* (*rt.* muh)
dispellers of doubts and, are pained by desire-infatuated.

अन्यच्च । लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते ।
anyad cha, lobhât krodhas pra-bhavati lobhât kâmas pra-jâyate,
-ya, *N. sg. n.* *Ind.* -bha, *Ab. sg.* -dha, *N. sg.* bhû *with* pra, 3 *sg. Pres. Par.* -bha, *Ab. sg.* -ma, *N. sg.* jan *with* pra. 3 *sg. Pres. Âtm.*
Again and, From desire passion springs, from desire lust is born,

लोभान्मोहश्च नाशश्च लोभः पापस्य कारणं ॥ २६ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| lobhât | mohas | cha, | nâśas | cha; | lobhas | pâpasya | kâraṇam. | (26) |
| -bha, *Ab.sg.* | -ha, *N. sg.* | *Ind.* | -śa, *N. sg.* | *Ind.* | -bha, *N. sg.* | -pa, *G. sg. n.* | -ṇa, *N. sg.* | |
| from desire | infatuation | and, | destruction | and; | desire | of evil | the cause. | |

अन्यच्च । असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| anyad | cha, | a-sambhavam | hema-mṛigasya | janma, | tathâ | api | râmas | lulubhe | mṛigâya; |
| -ya, *N. sg. n.* | *Ind.* | *Bahuv.* -va, *N. sg. n.* | *Ttp.* -ga, *G. sg.* | -man, *N. sg.* | *Ind.* | *Ind.* | -ma, *N. sg.* | lubh, 3 *sg. Perf. Âtm.* | -ga, *D. sg.* |
| Again | and, | Impossible | the gold-deer's | birth, | yet thus | even | Râma | had a desire | for the deer; |

प्रायः समापन्नविपत्तिकाले धियो ऽपि पुंसां मलिना भवंति ॥ २७ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| prâyas | samâpanna-vipatti-kâle | dhiyas | api | puṁsâm | malinâs | bhavanti. | (27) |
| *Ind.* | *Ttp.* -la, *L. sg.* (*rt.* pad *with* sam-â) | dhî, *N. pl.* | *Ind.* | puṁs, *G. pl.* | -na, *N. pl. f.* | bhû, 3 *pl. Pres. Par.* | |
| often | at the approached-misfortune's-time | the minds | even | of men | obscured | become. | |

अनंतरं सर्वे जालेन बद्धा बभूवुः । ततो यस्य वचनात्

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| an-antaram | sarve | jâlena | baddhâs | babhûvus. | tatas | yasya | vachanât |
| *Ind.* | -va, *N. pl. m.* | -la, *I. sg.* | bandh, *N. pl. m. past Ptc. Pass.* | bhû, 3 *pl. Perf. Par.* | *Ind.* | yad, *G. sg. m.* | -na, *Ab. sg.* |
| Immediately | all | by the net | caught | were. | Then | whose | through speech |

तत्रावलंबितास्तं सर्वे तिरस्कुर्वंति ।

| | | | | |
|---|---|---|---|---|
| tatra | ava-lambitâs | tam | sarve | tiras-kurvanti. |
| *Ind.* | lamb *with* ava, *N. pl. m. past. Ptc. Pass.* | tad, *Ac. sg. m.* | -va, *N. pl. m.* | kṛi *with* tiras, 3 *pl. Pres. Par.* |
| there | descended, | him | all | reproach. |

यतः । न गणस्याग्रतो गच्छेत्सिद्धे कार्ये समं फलं ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| yatas, | na | gaṇasya | agratas | gachchhet, | siddhe | kârye | samam | phalam, |
| *Ind.* | *Ind.* | -ṇa, *G. sg.* | *Ind.* | gam, 3 *sg. Pot. Par.* | sidh, *L. sg. n. past Ptc. Pass.* | -ya, *L. sg.* | -ma, *N. sg. n.* | -la, *N. sg.* |
| For, | not | of a mass | in front | one should go; | succeeding | the action, | equal | the fruit, |

यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ॥ २८ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| yadi | kârya-vipattis | syât | mukharas | tatra | hanyate. | (28) |
| *Ind.* | *Ttp.* -tti, *N. sg.* | as, 3 *sg. Pot. Par.* | -ra, *N. sg. m.* | *Ind.* | han, 3 *sg. Pres. Pass.* | |
| if | action-failure | should be, | the leader | there | is slain. | |

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच । नायमस्य दोषः ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| tasya | tiras-kâram | śrutvâ | chitra-grîvas | uvâcha: | na | ayam | asya | doshas; |
| tad, *G. sg. m.* | -ra, *Ac. sg.* | śru, *Ger.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | *Ind.* | idam, *N. sg. m.* | idam, *G. sg. m.* | -sha, *N. sg.* |
| Of him | the reproach | having heard | Chitragrîva | said: | Not | this | of him | the fault; |

यतः । आपदामापतंतीनां हितो ऽप्यायाति हेतुतां ।

| | | | | | | |
|---|---|---|---|---|---|---|
| yatas, | â-padâm | â-patantînâm | hitas | api | â-yâti | hetutâm; |
| *Ind.* | -pad, *G. pl.* | pat *with* â, *G. pl. f. Ptc. Pres. Par.* | -ta, *N. sg. m.* | *Ind.* | yâ *with* â, 3 *sg. Pres. Par.* | -tâ, *Ac. sg.* |
| For, | Of misfortunes | arriving | a friend | even | goes-to | the state of being the cause; |

मातृजंघा हि वत्सस्य स्तंभीभवति बंधने ॥ २९ ॥

| | | | | | |
|---|---|---|---|---|---|
| mâtṛi-jaṅghâ | hi | vatsasya | stambhî-bhavati | bandhane. | (29) |
| *Ttp.* -ghâ, *N. sg.* | *Ind.* | -sa, *G. sg.* | stambhî-bhû, 3 *sg. Pres. Par.* | -na, *L. sg.* | |
| the mother's-leg | for | of a calf | post-becomes | in the fastening | |

अन्यच्च । स बंधुर्यो विपन्नानामापदुद्धरणक्षमः ।

anyad cha, sas bandhus yas vi-pannânâm âpad-uddharaṇa-kshamas,

*-ya, N. sg. n.* *Ind.* tad, *N. sg. m.* -dhu, *N. sg.* yad, *N. sg. m.* pad *with* vi, *G. pl. m. past Ptc. Pass.* *Ttp.* -ma, *N. sg. m.*

Again and, He a friend who of the afflicted out of misfortune-to lift-able,

न तु भीतपरित्राणवस्तूपालंभपण्डितः ॥ ३० ॥

na tu bhîta-paritrâṇa-vastu-upâlambha-paṇḍitas. (30)

*Ind.* *Ind.* *Ttp.* -ta, *N. sg. m.*

Not but the danger-deliverance-means-reproaching-clever.

विपत्काले विस्मय एव कापुरुषलक्षणं । तदत्र धैर्यम-

vipad-kâle vi-smayas eva kâpurusha-lakshaṇam. tad atra dhairyam

*Ttp.* -la, *L. sg.* -ya, *N. sg.* *Ind.* *Ttp.* -ṇa, *N. sg.* *Ind.* *Ind.* -ya, *Ac. sg.*

At misfortune-time amazement just a weak-man's-mark. Therefore here firmness

वलंब्य प्रतीकारश्चिन्त्यतां ।

ava-lambya pratî-kâras chintyatâm.

lamb *with* ava, *Ger.* -ra, *N. sg.* chint, 3 *sg. Imp. Pass.*

embracing a-remedy let be thought of.

यतः । विपदि धैर्यमथाभ्युदये क्षमा

yatas, vi-padi dhairyam, atha abhi-ud-aye kshamâ,

*Ind.* -pad, *L. sg.* -ya, *N. sg.* *Ind.* -ya, *L. sg.* -mâ, *N. sg.*

For, In misfortune firmness, further in prosperity moderation,

सदसि वाक्पटुता युधि विक्रमः ।

sadasi vâch-paṭutâ, yudhi vi-kramas,

-das, *L. sg.* *Ttp.* -tâ, *N. sg.* -dh, *L. sg.* -ma, *N. sg.*

in an assembly word-cleverness, in battle heroism,

यशसि चाभिरुचिर्व्यसनं श्रुतौ

yaśasi cha abhi-ruchis, vyasanam śrutau,

-śas, *L. sg.* *Ind.* -chi, *N. sg.* -na, *N. sg.* -ti, *L. sg.*

in glory and contentment, diligence in sacred study,

प्रकृतिसिद्धमिदं हि महात्मनां ॥ ३१ ॥

prakṛiti-siddham idam hi mahat-âtmanâm. (31)

*Ttp.* -dha, *N. sg. n.* (*rt.* sidh) idam, *N. sg. n.* *Ind.* *Bahuv.* -man, *G. pl.*

by nature-accomplished this indeed of the great-minded.

संपदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वं ।

sam-padi yasya na harshas, vi-padi vi-sâdas, raṇe cha dhîratvam,

-pad, *L. sg.* yad, *G. sg. m.* *Ind.* -sha, *N. sg.* -pad, *L. sg.* -da, *N. sg.* -ṇa, *L. sg.* *Ind.* -tva, *N. sg.*

In happiness whose not exultation, in misfortune despair, in battle and firmness,

तं भुवनत्रयतिलकं जनयति जननी सुतं विरलं ॥ ३२ ॥

tam bhuvana-traya-tilakam janayati jananî sutam viralam. (32)

tad, *Ac. sg. m.* *Ttp.* -ka, *Ac. sg.* jan, 3 *sg. Pres. Par. Caus.* -nî, *N. sg.* -ta, *Ac. sg. m.* -la, *Ac. sg. n. Adv.*

him a world-triad-ornament bears a mother a son rarely.

अन्यच्च । षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।

anyad cha, shat doshâs purushena iha hâtavyâs bhûtim ichchhatâ,
-ya, *N. sg. n.* *Ind.* shash, *N.* -sha, *N. pl.* -sha, *I. sg.* *Ind.* hâ, *N. pl. m. Ptc. Fut. Pass.* -ti, *Ac. sg.* ish, *I. sg. m. Ptc. Pres. Par.*
Again and, Six faults by a man here to be avoided, prosperity wishing,

निद्रा तंद्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ३३ ॥

nidrâ tandrâ bhayam krodhas âlasyam dîrgha-sûtratâ. (33)
-râ, *N. sg.* -râ, *N. sg.* -ya, *N. sg.* -dha, *N. sg.* -ya, *N. sg.* -tâ, *N. sg.*
Sleep, sloth, fear, anger, laziness, procrastination.

इदानीमप्येवं क्रियतां । सर्वैरेकचित्तीभूय जालमादायोड्डीयतां ।

idânîm api evam kriyatâm; sarvais ekachittî-bhûya jâlam â-dâya ud-dîyatâm.
*Ind.* *Ind.* *Ind.* kri, 3 *sg. Imp. Pass.* -va, *I. pl. m.* ekachittî-bhû, *Ger.* -la, *Ac. sg.* dâ *with* â, *Ger.* dî *with* ud, 3 *sg. Imp. Pass.*
At present also thus may be acted; by all of one-mind-being, the net having taken, up-may be flown.

यतः । अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।

yatas, alpânâm api vastûnâm sam-hatis kârya-sâdhikâ,
*Ind.* -pa, *G. pl. n.* *Ind.* -tu, *G. pl.* -ti, *N. sg.* *Ttp.* -dhaka, *N. sg. f.*
For, Of small even things a combination aim-accomplishing,

तृणैर्गुणत्वमापन्नैर्बध्यंते मत्तदंतिनः ॥ ३४ ॥

trinais gunatvam â-pannais badhyante matta-dantinas. (34)
-na, *I. pl. m.* or *n.* -tva, *Ac. sg.* pad *with* â, *I. pl. m.* or *n. past Ptc. Pass.* bandh, 3 *pl. Pres. Pass.* *Karm.* -tin, *N. pl.* (*rt.* mad).
with grass blades, a rope's state having attained, are bound furious-elephants.

संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।

sam-hatis śreyasî puṁsâm sva-kulais alpakais api,
-ti, *N. sg.* praśasya. *N. sg. f. Compar.* puṁs, *G. pl.* *Karm.* -la, *I. pl.* -ka, *I. pl. n.* *Ind.*
Combination better of men with their-families small even,

तुषेणापि परित्यक्ता न प्ररोहंति तंडुलाः ॥ ३५ ॥

tushena api pari-tyaktâs na pra-rohanti tandulâs. (35)
-sha, *I. sg.* *Ind.* tyaj *with* pari, *N. pl. m. past Ptc. Pass.* *Ind.* ruh *with* pra, 3 *pl. Pres. Par.* -la, *N. pl.*
by the husk merely deserted not grow-up rice-grains.

इति विचिंत्य पक्षिणः सर्वे जालमादायोत्पतिताः ।

iti vi-chintya pakshinas sarve jâlam â-dâya ud-patitâs.
*Ind.* chint *with* vi, *Ger.* -shin, *N. pl. m.* -va, *N. pl. m.* -la, *Ac. sg.* dâ *with* â, *Ger.* pat *with* ud, *N. pl. m. past Ptc. Pass.*
Thus having considered, the birds all the net having taken, flown-up.

अनंतरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य

an-antaram sas vyâdhas su-dûrât jâla-apahârakân tân ava-lokya
*Ind.* tad, *N. sg. m.* -dha, *N. sg.* *Ind.* *Ttp.* -ka, *Ac. pl. m.* tad, *Ac. pl. m.* lok *with* ava, *Ger.*
Thereupon that hunter from very-far net-carrying off them having seen,

पश्चाद्धावन्नचिंतयत् ।

paśchât dhâvan achintayat:
*Ind.* dhâv, *N. sg. m. Ptc. Pres. Par.* chint, 3 *sg. Impf. Par.*
after running, thought:

E 2

संहतास्तु हरंत्येते मम जालं विहंगमाः ।

| | | | | | | |
|---|---|---|---|---|---|---|
| sam-hatâs | tu | haranti | ete | mama | jâlam | viham-gamâs, |
| han *with* sam, *N. pl. m. past Ptc. Pass.* | *Ind.* | hṛi, 3 *pl. Pres. Par.* | etad, *N. pl. m.* | asmad, *G. sg.* | -la, *Ac. sg.* | -ma, *N. pl.* |
| Combined | indeed | take away | these | of me | the net | the birds, |

यदा तु निपतिष्यंति वशमेष्यंति मे तदा ॥ ३६ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yadâ | tu | ni-patishyanti | vaśam | eshyanti | me | tadâ. | (36) |
| *Ind.* | *Ind.* | pat *with* ni, 3 *pl. Fut.* ii. *Par.* | -śa, *Ac. sg.* | i, 3 *pl. Fut.* ii. *Par.* | asmad, *G. sg.* | *Ind.* | |
| if | but | down-they shall fall, | into the power | they will go | of me | then. | |

ततस्तेषु चक्षुर्विषयातिक्रांतेषु पक्षिषु स व्याधो

| | | | | | |
|---|---|---|---|---|---|
| tatas | teshu | chakshus-vishaya-atikrânteshu | pakshishu | sas | vyâdhas |
| *Ind.* | tad, *L. pl. m.* | *Ttp.* -ta, *L. pl. m.* (*rt.* kram *with* ati) | -shin, *L. pl. m.* | tad, *N. sg. m.* | -dha, *N. sg.* |
| Then | those | the sight-confines-having passed | birds, | that | hunter |

निवृत्तः । अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता

| | | | | | |
|---|---|---|---|---|---|
| ni-vṛittas. | atha | lubdhakam | ni-vṛittam | dṛishṭvâ | kapotâs |
| vṛit *with* ni, *N. sg. m. past Ptc. Pass.* | *Ind.* | -ka, *Ac. sg.* | vṛit *with* ni, *Ac. sg. m. past Ptc. Pass.* | dṛiś, *Ger.* | -ta, *N. pl.* |
| returned. | Now | the hunter | returned | having seen | the pigeons |

ऊचुः । किमिदानीं कर्तुमुचितं । चित्रग्रीव उवाच ।

| | | | | | | |
|---|---|---|---|---|---|---|
| ûchus: | kim | idânîm | kartum | uchitam? | chitra-grîvas | uvâcha: |
| vach, 3 *pl. Perf. Par.* | kim, *Ac. sg. n.* | *Ind.* | kṛi, *Inf.* | -ta, *N. sg. n.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* |
| said: | What | now | to do | proper? | Chitragrîva | said: |

माता मित्रं पिता चेति स्वभावात्त्रितयं हितं ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| mâtâ | mitram | pitâ | cha | iti | sva-bhâvât | tritayam | hitam; |
| -tri, *N. sg.* | -ra, *N. sg.* | -tri, *N. sg.* | *Ind.* | *Ind.* | *Karm.* -va, *Ab. sg.* | -ya, *N. sg.* | -ta, *N. sg. n.* |
| A mother, | a friend, | a father | and, | thus | from inborn-disposition | a triad | friendly; |

कार्यकारणतश्चान्ये भवंति हितबुद्धयः ॥ ३७ ॥

| | | | | | |
|---|---|---|---|---|---|
| kârya-kârana-tas | cha | anye | bhavanti | hita-buddhayas. | (37) |
| *Dvandva, with* tas. | *Ind.* | -ya, *N. pl. m.* | bhû, 3 *pl. Pres. Par.* | *Bahuv.* -dhi, *N. pl. m.* | |
| from effect-and-cause | and | others | become | friendly-minded. | |

तदस्माकं मित्रं हिरण्यको नाम मूषिकराजो गंडकीतीरे

| | | | | | | |
|---|---|---|---|---|---|---|
| tad | asmâkam | mitram | hiranyakas | nâma | mûshika-râjas | gandakî-tîre |
| *Ind.* | asmad, *G. pl.* | -ra, *N. sg.* | -ka, *N. sg.* | -man, *Ac. sg. Adv.* | *Ttp.* -ja, *N. sg.* | *Ttp.* -ra, *L. sg.* |
| Now | of us | a friend | Hiranyaka | by name, | a mouse-king, | on the Gandakî-bank |

चित्रवने निवसति । सो ऽस्माकं पाशांश्छेत्स्यति ।

| | | | | | |
|---|---|---|---|---|---|
| chitra-vane | ni-vasati; | sas | asmâkam | pâśân | chhetsyati. |
| *Karm.* -na, *L. sg.* | vas *with* ni, 3 *sg. Pres. Par.* | tad, *N. sg. m.* | asmad, *G. pl.* | -śa, *Ac. pl.* | chhid, 3 *sg. Fut.* ii. *Par.* |
| in the Chitra-wood | dwells; | he | of us | the fetters | will cut. |

इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च

| | | | | | | |
|---|---|---|---|---|---|---|
| iti | â-lochya | sarve | hiranyaka-vivara-samîpam | gatâs. | hiranyakas | cha |
| *Ind.* | loch *with* â, *Ger.* | -va, *N. pl. m.* | *Ttp.* -pa, *Ac. sg. Adv.* | gam, *N. pl. m. past Ptc. Pass.* | -ka, *N. sg.* | *Ind.* |
| Thus | having reflected | all | Hiranyaka's-hole-near | gone. | Hiranyaka | and |

सर्वदापायशंकया शतद्वारं विवरं कृत्वा निवसति ।

| | | | | | |
|---|---|---|---|---|---|
| sarvadâ | apâya-śankayâ | śata-dvâram | vi-varam | kritvâ | ni-vasati. |
| *Ind.* | *Ttp.* -kâ, *I. sg.* | *Bahuv.* -ra, *Ac. sg. n.* | -ra, *Ac. sg.* | kri, *Ger.* | vas *with* ni, 3 *sg. Pres. Par.* |
| always | through danger-dread | a hundred-doored | hole | having made | dwells. |

ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः ।

| | | | | | |
|---|---|---|---|---|---|
| tatas | hiranyakas | kapota-avapâta-bhayât | chakitas | tûshnîm | sthitas. |
| *Ind.* | -ka, *N. sg.* | *Ttp.* -ya, *Ab. sg.* | -ta, *N. sg. m.* | *Ind.* | sthâ, *N. sg. m. past Ptc. Pass.* |
| Then | Hiranyaka | from the pigeon-descent-fear | timid | silently | stood. |

चित्रग्रीव उवाच । सखे हिरण्यक किमस्मान्न संभाषसे ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| chitra-grîvas | uvâcha: | sakhe | hiranyaka, | kim | asmân | na | sam-bhâshase? |
| *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | -khi, *V. sg.* | -ka, *V. sg.* | *Ind.* | asmad, *Ac. pl.* | *Ind.* | bhâsh *with* sam, 2 *sg. Pres. Âtm.* |
| Chitragrîva | said: | Friend | Hiranyaka, | why | us | not | dost thou greet? |

ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं

| | | | | |
|---|---|---|---|---|
| tatas | hiranyakas | tad-vachanam | prati-abhi-jñâya | sa-sambhramam |
| *Ind.* | -ka, *N. sg.* | *Ttp.* -na, *Ac. sg.* | jñâ *with* prati-abhi, *Ger.* | *Avyay.* |
| Then | Hiranyaka | of him-the voice | having recognised | hastily |

वहिर्निःसृत्याब्रवीत् । आः पुण्यवानस्मि प्रियसुहृन्मे

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| vahis | nis-sritya | abravît: | âh | punyavân | asmi, | priya-suhrid | me |
| *Ind.* | sri *with* nis, *Ger.* | brû, 3 *sg. Impf. Par.* | *Ind.* | -vat, *N. sg. m.* | as, 1 *sg. Pres. Par.* | *Karm.* -d, *N. sg.* | asmad, *G. sg.* |
| out | slipping | said: | Oh, | happy | I am, | the dear-friend | of me |

चित्रग्रीवः समायातः ।

| | |
|---|---|
| chitra-grîvas | sam-â-yâtas. |
| *Bahuv.* -va, *N. sg.* | yâ *with* sam *and* â, *N. sg. m. past Ptc. Pass.* |
| Chitragrîva | arrived. |

यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः ।

| | | | | | |
|---|---|---|---|---|---|
| yasya | mitrena | sam-bhâshâ | yasya | mitrena | sam-sthitis |
| yad, *G. sg. m.* | -ra, *I. sg.* | -shâ, *N. sg.* | yad, *G. sg. m.* | -ra, *I. sg.* | -ti, *N. sg.* |
| Whose | with a friend | greeting, | whose | with a friend | staying, |

यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥ ३८ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| yasya | mitrena | sam-lâpas | tatas | na | asti | iha | punyavân. | (38) |
| yad, *G. sg. m.* | -ra, *I. sg.* | -pa, *N. sg.* | tad *with Abl. aff.* tas. | *Ind.* | as, 3 *sg. Pres. Par.* | *Ind.* | -vat, *N. sg. m.* | |
| whose | with a friend | chatting, | than he | not | is there | here | a happier one. | |

पाशबद्धांश्चैतान्दृष्ट्वा सविस्मयः क्षणं

| | | | | | |
|---|---|---|---|---|---|
| pâśa-baddhân | cha | etân | drishtvâ | sa-vismayas | kshanam. |
| *Ttp.* -dha, *Ac. pl. m.* (*rt.* bandh). | *Ind.* | etad, *Ac. pl. m.* | driś, *Ger.* | *Bahuv.* -ya, *N. sg. m.* | -na, *Ac. sg. Adv.* |
| Net-confined | and | them | having seen | with-amazement | a moment |

स्थित्वोवाच । सखे किमेतत् । चित्रग्रीवोऽवदत् ।

| | | | | | | |
|---|---|---|---|---|---|---|
| sthitvâ | uvâcha: | sakhe | kim | etad? | chitra-grîvas | avadat: |
| sthâ, *Ger.* | vach, 3 *sg. Perf. Par.* | -khi, *V. sg.* | kim, *N. sg. n.* | etad, *N. sg. n.* | *Bahuv.* -va, *N. sg.* | vad, 3 *sg. Impf. Par.* |
| having stood | he said: | Friend, | what | this? | Chitragrîva | said: |

सखे ऽस्माकं प्राक्तनजन्मकर्मणः फलमेतत् ।

| | | | | |
|---|---|---|---|---|
| sakhe | asmâkam | prâktana-janman-karmaṇas | phalam | etad. |
| -khi, *V. sg.* | asmad, *G. pl.* | *Ttp.* -man, *G. sg.* | -la, *N. sg.* | etad, *N. sg. n.* |
| Friend, | of us | of a former-birth's-action | the fruit | this. |

यस्माच्च येन च यथा च यदा च यच्च

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| yasmât | cha | yena | cha | yathâ | cha | yadâ | cha | yad | cha |
| yad, *Ab. sg. n.* | *Ind.* | yad, *I. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | yad, *N. sg. n.* | *Ind.* |
| Wherefore | and, | by what | and, | how | and, | when | and, | as what | and, |

यावच्च यत्र च शुभाशुभमात्मकर्म ।

| | | | | | |
|---|---|---|---|---|---|
| yâvat | cha | yatra | cha | śubha-aśubham | âtman-karma, |
| -vat, *N. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Dvandva.* -bha, *N. sg. n.* | *Ttp.* -man, *N. sg.* |
| how great | and, | where | and, | good-(and) evil | one's own-action, |

तस्माच्च तेन च तथा च तदा च तच्च

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| tasmât | cha | tena | cha | tathâ | cha | tadâ | cha | tad | cha |
| tad, *Ab. sg. n.* | *Ind.* | tad, *I. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | tad, *N. sg. n.* | *Ind.* |
| therefore | and, | by that | and, | thus | and, | then | and, | as that | and, |

तावच्च तत्र च विधातृवशादुपैति ॥ ३९ ॥

| | | | | | |
|---|---|---|---|---|---|
| tâvat | cha | tatra | cha | vidhâtṛi-vaśât | upa-eti (39) |
| -vat, *N. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Ttp.* -śa, *Ab. sg.* | i *with* upa, 3 *sg. Pres. Par.* |
| so great | and, | there | and, | through fate's-power | it approaches. |

रोगशोकपरीतापबंधनव्यसनानि च ।

| | |
|---|---|
| roga-śoka-parîtâpa-bandhaṇa-vyasanâni | cha |
| *Dvandva.* -na, *N. pl.* | *Ind.* |
| Sickness-sorrow-pain-bonds-affliction | and, |

आत्मापराधवृक्षस्य फलान्येतानि देहिनां ॥ ४० ॥

| | | | |
|---|---|---|---|
| âtman-aparâdha-vṛikshasya | phalâni | etâni | dehinâm. (40) |
| *Ttp.* -sha, *G. sg.* | -la, *N. pl.* | etad. *N. pl. n.* | -hin, *G. pl. m.* |
| of the self-transgressions'-tree | the fruits | these | of creatures. |

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बंधनं छेत्तुं

| | | | | | |
|---|---|---|---|---|---|
| etad | śrutvâ | hiraṇyakas | chitra-grîvasya | bandhanam | chhettum |
| etad, *Ac. sg. n.* | śru, *Ger.* | -ka, *N. sg.* | *Bahuv.* -va, *G. sg.* | -na, *Ac. sg.* | chhid, *Inf.* |
| This | having heard | Hiraṇyaka | Chitragrîva's | bonds | to cut |

सत्वरमुपसर्पति । चित्रग्रीव उवाच । मित्र मा मैवं ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| sa-tvaram | upa-sarpati. | chitra-grîvas | uvâcha : | mitra | mâ | mâ | evam ; |
| *Avyay.* | sṛip, *with* upa, 3 *sg. Pres. Par.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | -ra, *V. sg.* | *Ind.* | *Ind.* | *Ind.* |
| with-haste | advances. | Chitragrîva | said : | Friend, | not, | not | thus ; |

अस्मदाश्रितानामेषां तावत्पाशांश्छिंधि तदा मम

| | | | | | | |
|---|---|---|---|---|---|---|
| asmad-âśritânâm | eshâm | tâvat | pâśân | chhindhi, | tadâ | mama |
| *Ttp.* -ta, *G. pl. m.* (*rt.* śri, *with* â) | etad, *G. pl. m.* | *Ind.* | -śa, *Ac. pl.* | chhid, 2 *sg. Imp. Par.* | *Ind.* | asmad, *G. sg.* |
| of my-dependants | of these, | first | the fetters | cut, | then | of me |

पाशं पश्चाच्छेत्स्यसि। हिरण्यको ऽप्याह। अहमल्पशक्ति-

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| pâśam | paśchât | chhetsyasi. | hiraṇyakas | api | âha: | aham | alpa-śaktis, |
| -śa, *Ac. sg.* | *Ind.* | chhid, 2 *sg. Fut.* ii. *Par.* | -ka. *N. sg.* | *Ind.* | ah, 3 *sg. Perf. Par.* | asmad, *N. sg.* | *Bahuv.* -ti, *N. sg. m.* |
| the fetter | afterwards | thou wilt cut. | Hiraṇyaka | also | said: | I | of little-strength, |

दंताश्च मे कोमलास्तदेतेषां पाशांश्छेत्तुं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| dantâs | cha | me | komalâs, | tad | eteshâm | pâśân | chhettum |
| -ta, *N. pl.* | *Ind.* | asmad, *G. sg.* | -la, *N. pl. m.* | *Ind.* | etad, *G. pl. m.* | -śa, *Ac. pl.* | chhid, *Inf.* |
| the teeth | and | of me | delicate, | therefore | of these | the fetters | to cut |

कथं समर्थः। तद्यावन्मे दंता न त्रुट्यंति

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| katham | samarthas? | tad | yâvat | me | dantâs | na | truṭyanti, |
| *Ind.* | -tha, *N. sg. m.* | *Ind.* | *Ind.* | asmad, *G. sg.* | -ta, *N. pl.* | *Ind.* | truṭ, 3 *pl. Pres. Par.* |
| how | able? | Therefore | as long as | of me | the teeth | not | break, |

तावत्तव पाशं छिनद्मि तदनंतरमेषामपि

| | | | | | | |
|---|---|---|---|---|---|---|
| tâvat | tava | pâśam | chhinadmi; | tad-anantaram | eshâm | api |
| *Ind.* | yushmad, *G. sg.* | -śa, *Ac sg.* | chhid, 1 *sg. Pres. Par.* | *Ind.* | etad, *G. pl. m.* | *Ind.* |
| so long | of thee | the fetter | I cut; | thereafter | of these | also |

बंधनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच।

| | | | | |
|---|---|---|---|---|
| bandhanam | yâvat-śakyam | chhetsyâmi. | chitra-grîvas | uvâcha: |
| -na, *Ac. sg.* | *Avyay.* | chhid, 1 *sg. Fut.* ii. *Par.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* |
| the bonds | as far as-possible | I shall cut. | Chitragrîva | said: |

अस्त्वेवं तथापि यथाशक्त्येतेषां बंधनं

| | | | | | | |
|---|---|---|---|---|---|---|
| astu | evam, | tathâ | api | yathâ-śakti | eteshâm | bandhanam |
| as, 3 *sg. Imp. Par.* | *Ind.* | *Ind.* | *Ind.* | *Avyay.* | etad, *G. pl. m.* | -na, *Ac. sg.* |
| Be it | so, | thus | even | according to-strength | of these | the bonds |

खंडय। हिरण्यकेनोक्तं। आत्मपरित्यागेन यदा-

| | | | | |
|---|---|---|---|---|
| khaṇḍaya. | hiraṇyakena | uktam: | âtman-parityâgena | yad |
| khaṇḍ, 2 *sg. Imp. Par.* | -ka, *I. sg.* | vach, *N. sg. n. past Ptc. Pass.* | *Ttp.* -ga, *I. sg.* | yad, *N. sg. n.* |
| divide. | By Hiraṇyaka | said: | by self-sacrifice | what |

श्रितानां परिरक्षणं तन्न नीतिवेदिनां संमतं।

| | | | | | |
|---|---|---|---|---|---|
| â-śritânâm | pari-rakshaṇam | tad | na | nîti-vedinâm | sam-matam. |
| śri *with* â, *G. pl. m. past Ptc. Pass.* | -ṇa, *N. sg.* | tad, *N. sg. n.* | *Ind.* | *Ttp.* -din, *G. pl. m.* | man *with* sam, *N. sg. n. past Ptc. Pass.* |
| of dependants | preservation, | that | not | of the policy-knowing | approved of. |

यतः। आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatas, | âpad-arthe | dhanam | rakshet, | dârân | rakshet | dhanais | api, |
| *Ind.* | *Ttp.* -tha, *L. sg. Adv.* | -na, *Ac. sg.* | raksh, 3 *sg. Pot. Par.* | -ra, *Ac. pl.* | raksh, 3 *sg. Pot. Par.* | -na, *I. pl.* | *Ind.* |
| For, | For misfortune's-sake | riches | one should save, | the wife | one should save | through the riches | even, |

आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ४१ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| âtmânam | satatam | rakshet | dârais | api | dhanais | api. (41) |
| -man, *Ac. sg.* | *Ac. sg. n. Adv.* | raksh, 3 *sg. Pot. Par.* | -ra, *I. pl.* | *Ind.* | -na, *I. pl.* | *Ind.* |
| oneself | constantly | one should save | through the wife | even, | through the riches | even. |

अन्यच्च । धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।

| | | | | |
|---|---|---|---|---|
| anyad | cha, | dharma-artha-kâma-mokshâṇâm | prâṇâs | saṁsthiti-hetavas, |
| -ya, *N. sg. n.* | *Ind.* | *Dvandva.* -sha, *G. pl.* | -ṇa, *N. pl.* | *Ttp.* -tu, *N. pl.* |
| Again | and, | Of virtue-wealth-desire-final liberation | life | the existence-cause, |

तान्निघ्नता किं न हतं रक्षता किं न रक्षितं ॥ ४२ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| tân | ni-ghnatâ | kim | na | hatam, | rakshatâ | kim | na | rakshitam? (42) |
| tad, *Ac. pl. m.* | han *with* ni, *I. sg. m. Pres. Ptc. Par.* | kim, *N. sg. n.* | *Ind.* | han, *N. sg. n. past Ptc. Pass.* | raksh, *I. sg. m. Pres. Ptc. Par.* | *id.* | *Ind.* | raksh, *past Ptc. Pass.* |
| that | by one destroying | what | not | destroyed, | by one saving | what | not | saved? |

चित्रग्रीव उवाच । सखे नीतिस्तावदीदृश्येव किंतु-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| chitra-grîvas | uvâcha: | sakhe | nîtis | tâvat | îdṛiśî | eva, | kim-tu |
| *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | -khi, *V. sg.* | -ti, *N. sg.* | *Ind.* | -śa, *N. sg. f.* | *Ind.* | *Ind. Ind.* |
| Chitragrîva | said: | Friend, | policy | certainly | such | just, | but |

अहमस्मदाश्रितानां दुःखं सोढुं सर्वथासमर्थः ।

| | | | | | |
|---|---|---|---|---|---|
| aham | asmad-âśritânâm | duḥkham | soḍhum | sarvathâ | a-samarthas; |
| asmad, *N. sg.* | *Ttp.* -ta, *G. pl. m.* (*rt.* śri *with* â) | -kha, *Ac. sg.* | sah, *Inf.* | *Ind.* | *Karm.* -tha, *N. sg. m.* |
| I | of my-dependants | the affliction | to bear | wholly | un-able; |

तेनेदं ब्रवीमि ।

| | | |
|---|---|---|
| tena | idam | bravîmi. |
| tad, *I. sg. n. Adv.* | idam, *Ac. sg. n.* | brû, 1 *sg. Pres. Par.* |
| therefore | this | I say. |

यतः । धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatas | dhanâni | jîvitam | cha | eva | para-arthe | prâjñas | ud-sṛijet; |
| *Ind.* | -na, *Ac. pl.* | -ta, *Ac. sg.* | *Ind.* | *Ind.* | *Ttp.* -tha, *L. sg. Adv.* | -ña, *N. sg. m.* | sṛij, *with* ud, 3 *sg. Pot. Par.* |
| For, | Riches, | life | and | even, | for another's-sake | the wise | should give-up; |

सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ ४३ ॥

| | | | | | |
|---|---|---|---|---|---|
| sat-nimitte | varam | tyâgas, | vi-nâśe | ni-yate | sati. (43) |
| *Ttp.* -tta, *L. sg.* | -ra, *N. sg. Adv.* | -ga, *N. sg.* | -śa, *L. sg.* | yam *with* ni, *L. sg. m. past Ptc. Pass.* | as, *L. sg. m. Ptc. Pres. Par.* |
| for good's sake | preferable | the sacrifice, | destruction | destined | being. |

अयमपरश्चासाधारणो हेतुः ।

| | | | | |
|---|---|---|---|---|
| ayam | aparas | cha | a-sâdhâraṇas | hetus; |
| idam, *N. sg. m.* | -ra, *N. sg. m.* | *Ind.* | *Bahuv.* -ṇa, *N. sg. m.* | -tu, *N. sg.* |
| This | another | and | un-paralleled | argument: |

जातिद्रव्यगुणानां च साम्यमेषां मया सह ।

| | | | | | |
|---|---|---|---|---|---|
| jâti-dravya-guṇânâm | cha | sâmyam | eshâm | mayâ | saha, |
| *Dvandva.* -ṇa, *G. pl.* | *Ind.* | -ya, *N. sg. n.* | etad, *G. pl. m.* | asmad, *I. sg.* | *Ind.* |
| of kind-substance-quality | and | equality | of these | me | with, |

मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति ॥ ४४ ॥

| | | | | | |
|---|---|---|---|---|---|
| mad-prabhutva-phalam | brûhi | kadâ | kim | tad | bhavishyati? (44) |
| *Ttp.* -la, *Ac. sg.* (*cf.* asmad) | brû, 2 *sg. Imp. Par.* | *Ind.* | kim, *N. sg. n.* | tad, *N. sg. n.* | bhû, 3 *sg. Fut. ii. Par.* |
| of me-the superiority-fruit, | say, | when | what | that | will be? |

अन्यच्च । विना वर्तनमेवैते न त्यजंति ममांतिकं ।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| anyad | cha, | vinâ | vartanam | eva | ete | na | tyajanti | mama | antikam, |
| -ya, *N. sg. n.* | *Ind.* | *Ind.* | -na, *Ac. sg.* | *Ind.* | etad, *N. pl. m.* | *Ind.* | tyaj, 3, *pl. Pres. Par.* | asmad, *G. sg.* | -ka, *Ac. sg.* |
| Again | and, | Without | wages | even, | these | not | abandon | of me | the proximity, |

तन्मे प्राणव्ययेनापि जीवयैतान्ममाश्रितान् ॥ ४५ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| tad | me | prâṇa-vyayena | api | jîvaya | etân | mama | â-śritân. | (45) |
| *Ind.* | asmad, *G. sg.* | *Ttp.* -ya, *I. sg.* | *Ind.* | jîv, 2 *sg. Imp. Par. Caus.* | etad, *Ac. pl. m.* | asmad, *G. sg.* | śri *with* â, *Ac. pl. m. past Ptc. Pass.* | |
| therefore | of me | with the life-loss | even | cause to live | these | of me | the dependants. | |

किंच । मांसमूत्रपुरीषास्थिनिर्मिते ऽस्मिन्कलेवरे ।

| | | | |
|---|---|---|---|
| kim-cha, | mâmsa-mûtra-purîsha-asthi-nirmite | asmin | kalevare |
| *Ind. Ind.* | *Ttp.* -ta, *L. sg. n.* (*rt.* mâ *with* nis) | idam, *L. sg. n.* | -ra, *L. sg.* |
| Moreover, | On the flesh-urine-excrement-bone-composed | this | body |

विनश्वरे विहायास्थां यशः पालय मित्र मे ॥ ४६ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| vi-naśvare | vi-hâya | â-sthâm | yaśas | pâlaya | mitra | me. | (46) |
| -ra, *L. sg. n.* | hâ *with* vi, *Ger.* | -sthâ, *Ac. sg.* | -śas, *Ac. sg.* | pâ, 2 *sg. Imp. Par. Caus.* | -ra, *V. sg.* | asmad, *G. sg.* | |
| the perishable | having given up | consideration, | the fame | preserve, | O friend, | of me. | |

अपरं च पश्य । यदि नित्यमनित्येन निर्मलं मलवाहिना ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| aparam | cha | paśya, | yadi | nityam | a-nityena | nis-malam | mala-vâhinâ |
| -ra, *Ac. sg. n.* | *Ind.* | dṛiś, 2 *sg. Imp. Par.* | *Ind.* | -ya, *N. sg. n.* | *Karm.* -ya, *I. sg. n.* | *Bahuv.* -la, *N. sg. n.* | *Ttp.* -hin, *I. sg. n.* |
| Another | and | behold, | If | the eternal | through the non-eternal, | the stain-less | through the stain-bringing, |

यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किं ॥ ४७ ॥

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| yaśas | kâyena | labhyeta, | tad | na | labdham | bhavet | nu | kim? | (47) |
| -śas, *N. sg.* | -ya, *I. sg.* | labh, 3 *sg. Pot. Pass.* | tad, *N. sg. n.* | *Ind.* | labh, *N. sg. n. past Ptc. Pass.* | bhû, 3 *sg. Pot. Par.* | *Ind.* | *Ind.* | |
| fame | through the body | might be obtained, | that | not | obtained | should be | well | why? | |

यतः । शरीरस्य गुणानां च दूरमत्यंतमंतरं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| yatas, | śarîrasya | guṇânâm | cha | dûram | ati-antam | antaram, |
| *Ind.* | -ra, *G. sg.* | -ṇa, *G. pl.* | *Ind.* | -ra, *N. sg. n.* | *Ttp.* -ta, *N. sg. n.* | -ra, *N. sg. n.* |
| For, | Of the body | of virtues | and, | a wide | exceeding | difference, |

शरीरं क्षणविध्वंसि कल्पांतस्थायिनो गुणाः ॥ ४८ ॥

| | | | | |
|---|---|---|---|---|
| śarîram | kshaṇa-vidhvamsi, | kalpa-anta-sthâyinas | guṇâs. | (48) |
| -ra, *N. sg.* | *Ttp.* -sin, *N. sg. n.* | *Ttp.* -yin. *N. pl. m.* | -ṇa, *N. pl.* | |
| the body | in a moment-falling asunder, | to a kalpa's-end-lasting | virtues. | |

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत् ।

| | | | | | | |
|---|---|---|---|---|---|---|
| iti | â-karṇya | hiraṇyakas | prahṛishṭa-manâs | pulakitas | san | abravît: |
| *Ind.* | karṇ *with* â, *Ger.* | -ka, *N. sg.* | *Bahuv.* -nas, *N. sg. m.* | -ta, *N. sg. m.* | as, *N. sg. m. Ptc. Pres. Par.* | brû, 3 *sg. Impf. Par.* |
| Thus | having heard | Hiraṇyaka | of delighted-mind | thrilled | being | said: |

साधु मित्र साधु । अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि

| | | | | | | |
|---|---|---|---|---|---|---|
| sâdhu, | mitra, | sâdhu; | anena | âśrita-vâtsalyena | trailokyasya | api |
| -dhu, *N. sg. n. Adv.* | -ra, *V. sg.* | -dhu, *N. sg. n. Adv.* | idam, *I. sg. n.* | *Ttp.* -ya, *I. sg.* | -ya, *G. sg.* | *Ind.* |
| Nobly, | friend, | nobly; | through this | towards the dependants-tenderness | of the three worlds | - even |

प्रभुत्वं त्वयि युज्यते। एवमुक्त्वा तेन सर्वेषां

prabhutvam tvayi yujyate. evam uktvâ tena sarveshâm

-tva, *N. sg.* yashmad, *L.sg.* yuj, 3 *sg.Pres. Pass.* *Ind.* vach, *Ger.* tad, *I.sg.m.* -va. *G. pl. m.*

the sovereignty in thee is proper. Thus having spoken by him of all

बंधनानि छिन्नानि। ततो हिरण्यकः सर्वान्सादरं संपूज्याह।

bandhanâni chhinnâni. tatas hiranyakas sarvân sa-âdaram sam-pûjya âha:

-na, *N. pl.* chhid, *N.pl.n.past Ptc. Pass.* *Ind.* -ka, *N. sg.* -va, *Ac.pl.m.* *Avyay.* pûj *with* sam, *Ger.* ah, 3.*sg. Perf.Par.*

the bonds cut. Then Hiranyaka all respectfully having saluted said:

सखे चित्रग्रीव सर्वथात्र जालबंधनविधौ सति दोषमा-

sakhe chitra-grîva, sarvathâ atra jâla-bandhana-vidhau sati dosham

-khi, *V.sg.* *Bahuv.* -va, *V.sg.* *Ind.* *Ind.* *Ttp.* -dhi, *L.sg.* as, *L.sg. m.Ptc. Pres. Par.* -sha, *Ac.sg.*

Friend Chitragrîva, wholly here the net-confinement-destiny being, a fault

शंक्यात्मन्यवज्ञा न कर्तव्या।

â-sankya âtmani ava-jñâ na kartavyâ.

sank *with* â, *Ger.* -man, *L.sg.* -jñâ, *N. sg.* *Ind.* kri, *N. sg.f. Ptc. Fut. Pass.*

suspecting, of one's self disdain not to be made.

यतः। यो ऽधिकाद्योजनशतात्पश्यतीहामिषं खगः।

yatas, yas adhikât yojana-satât pasyati iha âmisham kha-gas

*Ind.* yad, *N. sg. m.* -ka, *Ab. sg. n.* *Ttp.* -ta, *Ab. sg.* dris, 3 *sg. Pres. Par.* *Ind.* -sha, *Ac. sg.* *Ttp.* -ga, *N. sg.*

For, Who from a great yojana-hundred espies here the prey, a bird,

स एव प्राप्तकालस्तु पाशबंधं न पश्यति ॥ ४९ ॥

sas eva prâpta-kâlas tu pâsa-bandham na pasyati. (49)

tad, *N. sg.m.* *Ind.* *Bahuv.* -la, *N. sg. m.* *Ind.* *Ttp.* -dha, *Ac. sg.* *Ind.* dris, 3 *sg. Pres.Par.*

he even having reached-the time on the other hand the snare-knot not sees.

अपरं च। शशिदिवाकरयोर्ग्रहपीडनं

aparam cha, sasin-divâkarayos graha-pîdanam,

-ra, *N. sg. n.* *Ind.* *Dvandva.* -ra, *G. du.* *Ttp.* -na, *Ac. sg.*

Another and, Of moon-(and)-sun through eclipse-the distress,

गजभुजंगमयोरपि बंधनं।

gaja-bhujangamayos api bandhanam,

*Dvandva.* -ma, *G. du.* *Ind.* -na, *Ac. sg.*

of elephant-(and)-serpent also the binding,

मतिमतां च विलोक्य दरिद्रतां

matimatâm cha vi-lokya daridratâm,

-mat, *G. pl. m.* *Ind.* lok *with* vi, *Ger.* -tâ, *Ac. sg.*

of the wise and having perceived the indigence,

विधिरहो बलवानिति मे मतिः ॥ ५० ॥

vidhis aho balavân iti me matis. (50)

-dhi, *N. sg.* *Ind.* -vat, *N. sg. m.* *Ind.* asmad, *G. sg.* -ti, *N. sg.*

'destiny, Oh, powerful,' thus of me the thought.

अन्यच्च। व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवंत्यापदं।

| | | | | | | |
|---|---|---|---|---|---|---|
| anyad | cha, | vyoman-ekânta-vihâriṇas | api | vihagâs | sam-pra-âpnuvanti | â-padam, |
| -ya, *N. sg. n.* | *Ind.* | *Ttp.* -rin, *N. pl. m.* | *Ind.* | -ga, *N. pl.* | âp, *with* sam *and* pra, *3 pl. Pres. Par.* | -pad, *Ac. sg.* |
| Again | and, | In the air-exclusively-roaming | even | birds | meet | misfortune, |

बध्यंते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि।

| | | | | | |
|---|---|---|---|---|---|
| badhyante | nipuṇais | agâdha-salilât | matsyâs | samudrât | api; |
| bandh, *3 pl. Pres. Pass.* | -ṇa, *I. pl. m.* | *Bahuv.* -la, *Ab. sg. m.* | -ya, *N. pl.* | -ra, *Ab. sg.* | *Ind.* |
| captured are | by artful men | out of the deep-water containing | fishes | ocean | even; |

दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| dus-nîtam | kim | iha | asti, | kim | su-charitam? | kas | sthâna-lâbhe | guṇas? |
| *Karm.* -ta, *N. sg. n.* | kim, *N. sg. n.* | *Ind.* | as, *3 sg. Pres. Par.* | kim, *N. sg. n.* | *Karm.* -ta, *N. sg. n.* | kim, *N. sg. n.* | *Ttp.* -bha, *L. sg.* | -ṇa, *N. sg.* |
| Badly-conducted | what | here | is, | what | well-performed? | what | in position-obtainment | merit? |

कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ ५१ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| kâlas | hi | vyasana-prasârita-karas | gṛihṇâti | dûrât | api. | (51) |
| -la, *N. sg.* | *Ind.* | *Bahuv.* -ra, *N. sg. m.* | grah, *3 sg. Pres. Par.* | -ra, *Ab. sg. n.* | *Ind.* | |
| time | for | to destruction-having forth stretched-the hands | seizes | from afar | even. | |

इति प्रबोध्यातिथ्यं कृत्वालिंग्य च चित्रग्रीवस्तेन

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| iti | pra-bodhya | âtithyam | kṛitvâ | â-liṅgya | cha | chitra-grîvas | tena |
| *Ind.* | budh *with* pra, *Ger. Caus.* | -ya, *Ac. sg.* | kṛi, *Ger.* | liṅg *with* â, *Ger.* | *Ind.* | *Bahuv.* -va, *N. sg.* | tad, *I. sg. m.* |
| Thus | having instructed, | hospitality | having made, | having embraced | and, | Chitragrîva | by him |

संप्रेषितो यथेष्टदेशान्सपरिवारो ययौ। हिरण्यको

-da, *Ac. pl.* stabdhî-kri, *Ger.* sthâ, 2 *sg. Imp. Par.* *Ind.* asmad, *N. sg.* -da, *Ac. sg.* kri, 1 *sg. Pres. Par.* *Ind.* yushmad, *N. sg.*
the feet having stiffened, remain. When I a noise make, then thou

त्थाय सत्वरं पलायिष्यसि। मृगस्तथैव काकवचनेन

sthâ *with* ud, *Ger.* *Avyay.* ay *with* palâ, 2 *sg. Fut.* ii. *Par.* -ga, *N. sg.* *Ind.* *Ind.* *Ttp.* -na, *I. sg.*
having got up with-haste wilt run away. The deer thus just by the crow's-word

स्थितः। ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो

sthâ, *N. sg. m. past Ptc. Pass.* *Ind.* *Ttp.* -ti, *I. sg.* *Bahuv.* -na, *I. sg. m.* -dha, *N. sg. m.*
remained. Then by the field-owner, whose eyes-(were) expanded-with joy, the so-conditioned

मृग आलोकितः। आः स्वयं मृतोऽसि। इत्युक्त्वा मृगं

-ga, *N. sg.* lok *with* â, *N. sg. m. past Ptc. Pass.* *Ind.* *Ind.* mri, *N. sg. m. past Ptc. Pass.* as, *2 sg. Pres. Par.* *Ind.* vach, *Ger.* -ga, *Ac. sg.*

deer perceived. 'Ha! of thyself dead thou art.' Thus having said the deer

बंधनान्मोचयित्वा पाशान्ग्रहीतुं सयत्नो बभूव। ततः

-na, *Ab. sg.* much, *Ger.* -sa, *Ac. pl.* grah, *Inf.* *Bahuv.* -na, *N. sg. m.* bhû, *3 sg. Perf. Par.* *Ind.*

from the fetter having delivered, the snare to take up busy he was. Then

काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः।

*Ttp.* -da, *Ac. sg.* śru, *Ger.* -ga, *N. sg.* *Avyay.* sthâ *with* ud, *Ger.* ay *with* palâ, *N. sg. m. past Ptc. Pass.*

the crow's-voice having heard, the deer with-haste having risen, escaped.

तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो हतः।

tad, *Ac. sg. m.* diś *with* ud, *Ger.* tad, *I. sg. m.* *Ttp.* -ti, *I. sg.* kship, *I. sg. m. past Ptc. Pass.* -da, *I. sg.* -la, *N. sg.* han, *N. sg. m. past Ptc. Pass.*

Him aiming-at by that field-owner with a thrown stick the jackal killed.

तथा चोक्तं। त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः।

*Ind.* *Ind.* vach, *N. sg. n. past Ptc. Pass.* tri, *I. pl.* -sha, *I. pl.* tri, *I. pl.* -sa, *I. pl.* tri, *I. pl.* -sha, *I. pl.* tri, *I. pl.* -na, *I. pl.*

Thus and said: In three years, in three months, in three fortnights, in three days,

अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते॥ ८२॥

*Karm.* -ṭa, *I. pl. n.* *Dvandva.* -ya, *I. pl. n.* *Ind.* *Ind.* -la, *Ac. sg.* aś, *3 sg. Pres. Âtm.*

through extraordinary good (and)-bad (actions) here even the fruit one reaps. (82)

अतोऽहं ब्रवीमि भक्ष्यभक्षकयोः प्रीतिरित्यादि। काकः पुनराह।

*Ind.* asmad, *N. sg.* brû, *1 sg. Pres. Par.* *Dvandva.* -ka, *G. du.* -ti, *N. sg.* *Bahuv.* -di, *Ac. sg. n.* -ka, *N. sg.* *Ind.* ah, *3 sg. Perf. Par.*

Therefore I say: Of the food-(and) the eater the affection, etc. The crow again says:

भक्षितेनापि भवता नाहारो मम पुष्कलः।

bhaksh, *I sg. m. past Ptc. Pass.* *Ind.* -vat, *I. sg. m.* *Ind.* -ra, *N. sg.* asmad, *G. sg. m.* -la, *N. sg. m.*

Eaten even by you not the food of me plenteous,

त्वयि जीवति जीवामि चित्रग्रीव इवानघ॥ ८३॥

yushmad, *L. sg.* jîv, *L. sg. m. Ptc. Pres. Par.* *1 sg. Pres. Par.* *Bahuv.* -va, *N. sg.* *Ind.* *Bahuv.* -gha, *V. sg.*

in thee living I live, Chitragrîva like, oh harmless! (83)

अन्यच्च। तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणां।

-ya, *N. sg. n.* *Ind.* tiryach, *G. pl. m.* *Ind.* -sa, *N. sg.* driś, *N. sg. m. past Ptc. Pass.* *Bahuv.* -man, *G. pl. m.*

Again and, Of brutes even confidence is seen (performing) pure-only-actions,

सतां हि साधुशीलत्वात्स्वभावो न निवर्तते ॥ ८४ ॥

-t, *G. pl. m.* *Ind.* -tva, *Ab. sg.* *Karm.* -va, *N. sg.* *Ind.* vṛit *with* ni, 3 *sg. Pres. Âtm.*
of the good for from good-character the natural-disposition not turns away. (84)

किंच। साधोः प्रकोपितस्यापि मनो नायाति विक्रियां।

*Ind.* -dhu, *G. sg. m.* kup *with* pra, *G. sg. m. past Ptc. Pass. Caus.* *Ind.* -nas, *N. sg.* *Ind.* yâ *with* â, 3 *sg. Pres. Par.* -yâ, *Ac. sg.*
Moreover, of the good irritated even the mind not goes-to change,

न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ ८५ ॥

*Ind.* *Ind.* tap, *Inf. Caus.* -ya, *N. sg. n.* *Ttp.* -bhas, *N. sg.* *Ttp.* -kâ, *I. sg.*
Not for to heat possible the ocean-water with a straw-fire. (85)

हिरण्यको ब्रूते। चपलस्त्वं चपलेन सह स्नेहः सर्वथा

-ka, *N. sg.* brû, 3 *sg. Pres. Âtm.* -la, *N. sg. m.* yushmad, *N. sg.* -la, *I. sg.* *Ind.* -ha, *N. sg.* *Ind.*
Hiraṇyaka says: Unsteady thou, an unsteady one with friendship by any means

न कर्तव्यः।

*Ind.* kṛi, *N. sg. m. Ptc. Fut. Pass,*
not to be made.

तथा चोक्तं। मार्जारो महिषो मेषः काकः कापुरुषस्तथा।

*Ind.* *Ind.* vach, *N. sg. n. past Ptc. Pass.* -ra, *N. sg.* -sha, *N. sg.* -sha, *N. sg.* -ka, *N. sg.* *Karm.* -sha, *N. sg.* *Ind.*
Thus and said: A cat, a buffalo, a ram, a crow, a bad man likewise,

विश्वासात्प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥ ८६ ॥

-sa, *Ab. sg.* bhû *with* pra, 3 *pl. Pres. Par.* etad, *N. pl. m.* -sa, *N. sg.* *Ind.* *Ind.* -ta, *N. sg. m.*
from confidence become strong these; confidence there not proper. (86)

किंचान्यत्। शत्रुपक्षो भवानस्माकं। उक्तं चैतत्।

*Ind.* -ya, *N. sg. n.* *Bahuv.* -sha, *N. sg. m.* -vat, *N. sg. m.* asmad, *G. pl.* vach, *N. sg. n. past Ptc. Pass.* *Ind.* etad, *N. sg. n.*
Besides another; with the enemies-siding you of us; said and this:

शत्रुणा न हि संदध्यात्सुश्लिष्टेनापि संधिना।

-ru, *I. sg.* *Ind.* *Ind.* dhâ *with* sam, 3 *sg. Pot. Par.* *Karm.* -ṭa, *I. sg. m.* *Ind.* -dhi, *I. sg.*
With an enemy not surely one should unite oneself through a well-fastened even union,

सुतप्तमपि पानीयं शमयत्येव पावकं ॥ ८७ ॥

*Karm.* -ta, *N. sg. n.* *Ind.* -ya, *N. sg.* śam, 3 *sg. Pres. Par. Caus.* *Ind.* -ka, *Ac. sg.*
well-heated also water quenches yet the fire. (87)

दुर्जनः परिहर्तव्यो विद्ययालंकृतो ऽपि सन् ।

*Karm.* -na, *N. sg.* hṛi *with* pari, *N. sg. m. Ptc. Fut. Pass.* -yâ, *I. sg.* kṛi *with* alam, *N. sg. m. past Ptc. Pass.* *Ind.* as, *N. sg. m. Ptc. Pres. Par.*
A wicked man to be avoided with knowledge decorated even being,

मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ ८८ ॥

-ṇi, *I. sg.* bhûsh, *N. sg. m. past Ptc. Pass.* -pa, *N. sg.* *Ind.* adas, *N. sg. m.* *Ind.* *Ttp.* -ra, *N. sg. m.*
with the jewel decorated the serpent, (is) he not terrific? (88)

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।

yad, *N. sg. n.* *Karm.* -ya, *N. sg. n.* *Ind.* tad, *N. sg. n.* -ya, *N. sg. n.* yad, *N. sg. n.* -ya, *N. sg. n.* *id.* *Ind.* tad, *N. sg. n.*
What impossible, not that possible; what possible, possible certainly that;

नोदके शकटं याति न च नौर्गच्छति स्थले ॥ ८९ ॥

*Ind.* -ka, *L. sg.* -ṭa, *N. sg.* yâ, 3 *sg. Pres. Par.* *Ind.* *Ind.* nau, *N. sg.* gam, 3 *sg. Pres. Par.* -la, *L. sg.*
not in water a cart goes, not and a ship goes on dry land. (89)

अपरं च । महताप्यर्थसारेण यो विश्वसिति शत्रुषु ।

-ra, *N. sg. n.* *Ind.* -hat, *I. sg. m.* *Ind.* *Ttp.* -ra, *I. sg.* yad, *N. sg. m.* śvas *with* vi, 3 *sg. Pres. Par.* -ru, *L. pl.*
Another and, With great even wealth-affluence who confides in enemies.

भार्यासु च विरक्तासु तदंतं तस्य जीवनं ॥ ९० ॥

-yâ, *L. pl.* *Ind.* rañj *with* vi, *L. pl. f. past Ptc. Pass.* *Bahuv.* -ta, *N. sg. n.* tad, *G. sg. m.* -na, *N. sg.*
in wives and disaffectionate, there-ending of him the sustenance. (90)

लघुपतनको ब्रूते । श्रुतं मया सर्वं । तथापि मम

-ka, *N. sg.* brû, 3 *sg. Pres. Âtm.* śru, *N. sg. n. past Ptc. Pass.* asmad, *I. sg.* -va, *N. sg. n.* *Ind.* *Ind.* asmad, *G. sg.*
Laghupatanaka says: Heard by me all. Thus even of me

चैतावान्संकल्पस्त्वया सह सौहृद्यमवश्यं करणीयमिति ।

*Ind.* -vat, *N. sg. m.* -pa, *N. sg.* yushmad, *I. sg.* *Ind.* -ya, *N. sg.* -ya, *Ac. sg. n. Adv.* kṛi, *N. sg. n. Ptc. Fut. Pass.* *Ind.*
and such the resolution: 'Thee with friendship necessarily to be made,' thus;

नो चेदनाहारेणात्मानं व्यापादयिष्यामि । तथा हि ।

*Ind.* *Ind.* *Karm.* -ra, *I. sg.* -man, *Ac. sg.* pad *with* vi-â, 1 *sg. Fut.* ii. *Par. Caus.* *Ind.* *Ind.*
not if, through want of food myself I shall kill. Thus for:

मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।

*Ind.* -ya, *N. sg. m.* (*rt.* bhid) -na, *N. sg. m.* *Ind.* *Karm.* -na, *N. sg.* bhû, 3 *sg. Pres. Par.*
Earthen-pot-like easy-to be broken, difficult-to be united and, the wicked man is;

सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशुसंधेयः ॥ ९१ ॥

Karm. -na, N. sg. — Ind. — Ind. — -ya, N. sg. m. — Ind. — -ya, N. sg. m. (rt. dhâ with sam) Ptc. Fut. Pass.

the good man, — on the contrary — golden-pot-like — difficult-to be broken — and — easily to be united. (91)

किंच। द्रवत्वात्सर्वलोहानां निमित्तान्मृगपक्षिणां।

Ind. — -tva, Ab. sg. — Karm. -ha, G. pl. — -ta, Ab. sg. — Dvandva. -kshin, G. pl.

Moreover, — From fluxibility — of all-metals, — from a motive — of beasts-(and) birds,

भयाल्लोभाच्च मूर्खाणां संगतं दर्शनात्सतां ॥ ९२ ॥

-ya, Ab. sg. — -bha, Ab. sg. — Ind. — -kha, G. pl. — -ta, N. sg. n. — -na, Ab. sg. — -t, G. pl. m.

from fear, — cupidity — and, — of the fools — the union, — from sight — of the good. (92)

किंच। नारिकेलसमाकारा दृश्यंते ऽपि हि सज्जनाः।

Ind. — Bahuv. -ra, N. pl. m. — dṛiś, 3 pl. Pres. Pass. — Ind. — Ind. — Karm. -na, N. pl.

Moreover, — Cocoanut-like-formed — are seen — also — indeed — the good-men,

अन्ये बदरिकाकारा बहिरेव मनोहराः ॥ ९३ ॥

-ya, N. pl. m. — Bahuv. -ra, N. pl. m. — Ind. — Ind. — Ttp. -ra, N. pl. m.

others — jujube-shaped — externally — merely — charming. (93)

स्नेहच्छेदे ऽपि साधूनां गुणा नायांति विक्रियां।

Ttp. -da, L. sg. — Ind. — -dhu, G. pl. m. — -ṇa, N. pl. — Ind. — yâ with â, 3 pl. Pres. Par. — -yâ, Ac. sg.

In love-interruption — even — of the good — the virtues — not — go-to — change,

भंगे ऽपि हि मृणालानामनुबध्नंति तंतवः ॥ ९४ ॥

-ga, L. sg. — Ind. — Ind. — -la, G. pl. — bandh with anu, 3 pl. Pres. Par. — -tu, N. pl.

in the fracture — even — for — of lotus stalks — remain connected — the fibres. (94)

अन्यच्च। शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः।

-ya, N. sg. n. — Ind. — -tva, N. sg. n. — -tâ, N. sg. — -ya, N. sg. — -ya, N. sg. — Dvandva. -kha, L. du.

Again — and, — Purity, — generosity, — bravery, — constancy — in happiness (and)-misfortune,

दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ ९५ ॥

-ya, N. sg. — Ind. — -ti, N. sg. — Ind. — -tâ, N. sg. — Ind. — Ttp. -ṇa, N. pl.

rectitude — and, — attachment — and, — veracity — and, — a friend's-qualities. (95)

एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत्प्रा-

etad, I. pl. m. — -ṇa, I. pl. — i with upa, N. sg. m. past Ptc. Pass. — Ttp. -ya, N. sg. m. — asmad, I. sg. — kim, N. sg. m. — -d, N. sg.

With these — qualities — endowed — but you-another — by me — who — as a friend

प्यः। इत्यादि तद्वचनमाकर्ण्य हिरण्यको

âp with pra, N. sg. m. Ptc. Fut. Pass. — Bahuv. -di, Ac. sg. n. — Ttp. -na, Ac. sg. — karṇ with â, Ger. — -ka, N. sg.

to be found? — Thus-beginning — of him-the speech — having heard, — Hiraṇyaka

**वहिर्निःसृत्याह। आप्यायितोऽहं भवतामनेन**

*Ind.* sṛi *with* nis, *Ger.* | ah, 3 *sg. Perf. Par.* | pyai *with* â, *N. sg. m. past Ptc. Pass. Caus.* | asmad, *N. sg.* | -vat, *G. pl. m.* | idam, *I. sg. n.*

forth out-slipping says; Regaled I of you by this

**वचनामृतेन। तथा चोक्तं।**

*Ttp.* -ta, *I. sg.* | *Ind.* | *Ind.* | vach, *N. sg. n. past Ptc. Pass.*

word-nectar. Thus and said:

**घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली**

*Ttp.* -ta, *Ac. sg. m.* | *Ind.* | *Ind.* | *Karm.* -la, *I. pl.* | -na, *N. sg.* | *Ind.* | *Ttp.* -lî, *N. sg.*

The heat-oppressed not thus with cool-waters bathing, not a pearl-necklace,

**न श्रीखंडविलेपनं सुखयति प्रत्यंगमप्यर्पितं।**

*Ind.* | *Ttp.* -na, *N. sg.* | sukhaya, 3 *sg. Pres. Par.* | *Avyay.* | *Ind.* | ṛi, *N. sg. n. past Ptc. Pass. Caus.*

not sandal-ointment comforts, limb by limb even applied,

**प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसः**

-ti, *D. sg.* | *Ttp.* -ta, *N. sg.* | bhû *with* pra, 3 *sg. Pres. Par.* | *Ind.* | *Ind.* | -tas, *G. sg.*

to the gratification of good-men-the speech serves commonly as of the mind,

**सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमंत्रोपमं ॥ ९६ ॥**

*Karm.* -ti, *I. sg.* | *Ind.* | kṛi *with* puras, *N. sg. n. past Ptc. Pass.* | -tin, *G. pl. m.* | *Bahuv.* -ma, *N. sg. n.*

with good-argument and put-forth of the good, attraction-charm-equal. (96)

**अन्यच्च। रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता।**

-ya, *N. sg. n.* | *Ind.* | *Ttp.* -da, *N. sg.* | -ñâ, *N. sg.* | *Ind.* | -ya, *N. sg.* | -tâ, *N. sg.*

Again and, Secret-betrayal, begging and, severity, fickle-mindedness,

**क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणं ॥ ९७ ॥**

-dha, *N. sg.* | -tâ, *N. sg.* | -ta, *N. sg.* | etad, *N. sg. n.* | -ra, *G. sg.* | -ṇa, *N. sg.*

anger want-of truth, gambling,— this a friend's fault. (97)

**अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते ॥**

idam, *I. sg. m.* | *Ttp.* -ma, *I. sg.* | *Ttp.* -ṇa, *N. sg.* | *Ind.* | yushmad, *L. sg.* | *Ind.* | laksh, 3 *sg. Pres. Pass.*

Through this speech-course of them-one-fault even in thee not is perceived:

**यतः। पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते।**

*Ind.* | -tva, *N. sg.* | -tva, *N. sg.* | *Ttp.* -ga, *I. sg.* | budh, 3 *sg. Pres. Pass.*

For, Eloquence, veracity, through the speech-course is known,

**अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ॥ ९८ ॥**

-tva, *N. sg.* | -ya, *N. sg.* | -ksha, *I. sg. n. Adv.* | gam *with* ava, 3 *sg. Pres. Pass.*

unsteadiness, fickleness, at sight is discovered. (98)

अपरं च । अन्यथैव हि सौहार्दं भवेत्स्वच्छांतरात्मनः ।

-ra, *N. sg. n.* *Ind.* *Ind.* *Ind.* *Ind.* -da, *N. sg.* bhû, 3 *sg. Pot. Par.* *Bahuv.* -man, *G. sg. m.*

Another and, Otherwise truly for the friendship will be of the pure-minded,

प्रवर्तते ऽन्यथा वाणी शाठ्योपहतचेतसः ॥ ९९ ॥

vrit *with* pra, 3 *sg. Pres. Âtm.* *Ind.* -nî, *N. sg.* *Bahuv.* -tas, *G. sg. m.*

proceeds otherwise the language of one whose heart-is affected- by deceit. (99)

मनस्यन्यद्वचस्यन्यत्कार्यमन्यद्दुरात्मनां ।

-nas, *L. sg.* -ya, *N. sg. n.* -chas, *L. sg.* -ya, *N. sg. n.* -ya, *N. sg. n.* -ya, *N. sg. n.* *Bahuv.* -man, *G. pl. m.*

In the mind another thing, in the speech another, the action another of the wicked,

मनस्येकं वचस्येकं कर्मण्येकं महात्मनां ॥ १०० ॥

-nas, *L. sg.* -ka, *N. sg. n.* -chas, *L. sg.* -ka, *N. sg. n.* -man, *L. sg.* -ka, *N. sg. n.* *Bahuv.* -man, *G. pl. m.*

in the mind one thing, in the speech one, in the action one of the noble-minded. (100)

तद्भवतु भवतो ऽभिमतमेव । इत्युक्त्वा हिरण्यको

*Ind.* bhû, 3 *sg. Imp. Par.* -vat, *G. sg. m.* man *with* abhi, *N. sg. n. past. Ptc. Pass.* *Ind.* *Ind.* vach, *Ger.* -ka, *N. sg.*

Therefore be of you the wished even. Thus having said Hiranyaka

मैत्र्यं विधाय भोजनविशेषैर्वायसं संतोष्य विवरं

-ya, *Ac. sg.* dhâ *with* vi, *Ger.* *Ttp.* -sha, *I. pl.* -sa, *Ac. sg.* tush+sam, *Ger. Caus.* -ra, *Ac. sg.*

friendship having made, with food-dainties the crow having regaled, the hole

प्रविष्टः । वायसो ऽपि स्वस्थानं गतः । ततः प्रभृति तयो-

viś *with* pra, *N. sg. m. past. Ptc. Pass.* -sa, *N. sg.* *Ind.* *Karm.* -na, *Ac. sg.* gam *N. sg. m. past Ptc. Pass.* *Ind.* *Ind.* tad, *G. du. m.*

entered. The crow also to his-place gone. Thence-forward of those two

रन्योन्याहारप्रदानेन कुशलप्रश्नैर्विस्रंभालापैश्च कालो ऽतिवर्तते ।

*Ttp.* -na, *I. sg.* *Ttp.* -na, *I. pl.* *Ttp.* -pa, *I. pl.* *Ind.* -la, *N. sg.* vrit *with* ati, 3 *sg. Pres. Âtm.*

with mutual-food-presenting, with health-enquiries, with confidential-conversations and, the time passes by.

एकदा लघुपतनको हिरण्यकमाह । सखे कष्टतरलभ्याहार-

*Ind.* -ka, *N. sg.* -ka, *Ac. sg.* ah, 3 *sg. Perf. Par.* -khi, *V. sg.* *Bahuv.* -ra, *Ac. sg. n.*

One day Laghupatanaka to Hiranyaka says: Friend, with very difficult-to be procured-food

मिदं स्थानं परित्यज्य स्थानांतरं गंतुमिच्छामि ।

idam, *Ac. sg. n.* -na, *Ac. sg.* tyaj *with* pari, *Ger.* *Ttp.* -ra, *Ac. sg.* gam, *Inf.* ish, 1 *sg. Pres. Par.*

this place having left to another place to go I wish.



SOCIETY

हिरण्यको ब्रूते। मित्र क्व गंतव्यं। तथा चोक्तं।

-ka, *N. sg.* brû, 3 *sg. Pres. Âtm.* -ra, *V. sg.* *Ind.* gam, *N. sg. n. Ptc. Fut. Pass.* *Ind.* *Ind.* vach, *N. sg. n. past Ptc. Pass.*

Hiranyaka says: Friend, where to be gone? Thus and said:

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्।

chal, 3 *sg. Pres. Par.* -ka, *I. sg. m.* -da, *I. sg.* sthâ, 3 *sg. Pres. Par.* -ka, *I. sg. m.* -mat, *N. sg. m.*

He goes with one foot, he stands with one, the wise man,

मासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्॥ १०१॥

*Ind.* îksh *with* sam, *Ger. with* a -ra, *Ac. sg. n.* -na, *Ac. sg.* -va, *Ac. sg. n.* -na, *Ac. sg.* tyaj, 3 *sg. Pot. Par.*

not, without-having seen another place, the former abode one should leave. (101)

वायसो ब्रूते। अस्ति सुनिरूपितस्थानं। हिरण्यको ऽवदत्।

-sa, *N. sg.* brû, 3 *sg. Pres. Âtm.* as, 3 *sg. Pres. Par.* *Karm.* -na, *N. sg.* -ka, *N. sg.* vad, 3 *sg. Impf. Par.*

The crow says: There is a well-investigated-place. Hiranyaka said:

किं तत्। वायसो ब्रूते। अस्ति दंडकारण्ये

kim, *N. sg. n.* tad, *N. sg. n.* -sa, *N. sg.* brû, 3 *sg. Pres. Âtm.* as, 3 *sg. Pres. Par.* *Karm.* -ya, *L. sg.*

What that? The crow says: There is in the Dandaka-wood

कर्पूरगौराभिधानं सरः। तत्र चिरकालोपार्जितः प्रियसुहृन्मे

*Bahuv.* -na, *N. sg. n.* -ras, *N. sg.* *Ind.* *Ttp.* -ta, *N. sg. m.* *Karm.* -d, *N. sg.* asmad, *G. sg.*

Karpûragaura-named a lake; there since a long-time-acquired a dear-friend of me

मंथराभिधानः कच्छपो धार्मिकः प्रतिवसति।

*Bahuv.* -na, *N. sg. m.* -pa, *N. sg.* -ka, *N. sg. m.* vas *with* prati, 3 *sg. Pres. Par.*

Manthara-named a tortoise, virtuous, dwells.

यतः। परोपदेशे पांडित्यं सर्वेषां सुकरं नृणां।

*Ind.* *Ttp.* -śa, *L. sg.* -ya, *N. sg.* -va, *G. pl. m.* -ra, *N. sg. n.* nri, *G. pl.*

For, In to others-advice skill of all easy of men,

धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः॥ १०२॥

-ma, *L. sg.* -ya, *N. sg. n.* -na, *N. sg.* kim-chid. *G. sg. m.* *Ind.* *Bahuv.* -man, *G. sg. m.*

in virtue one's own practice of some one, indeed, highminded. (102)

स च भोजनविशेषैर्मां संवर्धयिष्यति। हिरण्यको

tad, *N. sg. m.* *Ind.* *Ttp.* -sha, *I. pl.* asmad, *Ac. sg.* vridh *with* sam, 3 *sg. Fut.* ii. *Par. Caus.* -ka, *N. sg.*

He and with food-dainties me will treat. Hiranyaka

ऽप्याह । तत्किमत्रावस्थाय मया कर्तव्यं ।

*Ind.* ah, 3 *sg. Perf.* *Ind.* kim, *N. sg. n.* *Ind.* sthâ *with* ava, *Ger.* asmad, *I. sg.* kṛi, *N. sg. n. Ptc. Fut. Pass.*
also says: Then, what, here staying, by me to be done?

यतः । यस्मिन्देशे न संमानो न वृत्तिर्न च बांधवः ।

*Ind.* yad, *L. sg. m.* -śa, *L. sg.* *Ind.* -na, *N. sg.* *Ind.* -ti, *N. sg.* *Ind.* *Ind.* -va, *N. sg.*
For, In which place not honour, not employment, not and a friend,

न च विद्यागमः कश्चित्तं देशं परिवर्जयेत् ॥ १०३ ॥

*Ind.* *Ind.* *Ttp.* -ma, *N. sg.* kim-chid, *N. sg. m.* tad, *Ac. sg. m.* -śa, *Ac. sg.* vṛij *with* pari, 3 *sg. Pot. Par.*
not and knowledge-advancement some, that place one should abandon. (103)

अपरं च । लोकयात्राभयं लज्जा दाक्षिण्यं त्यागशीलता ।

-ra, *N. sg. n.* *Ind.* *Ttp.* -râ, *N. sg.* *Karm.* -ya, *N. sg.* -jâ, *N. sg.* -ya, *N. sg.* -tâ, *N. sg.*
Another and, Traffic, safety, shame, rectitude, generosity,

पंच यत्र न विद्यंते न कुर्यात्तत्र संस्थितिं ॥ १०४ ॥

-chan, *N.* *Ind.* *Ind.* vid, 3 *pl. Pres. Pass.* *Ind.* kṛi, 3 *sg. Pot. Par.* *Ind.* -ti, *Ac. sg.*
the five where not are found, not should one make there a residence. (104)

तत्र मित्र न वस्तव्यं यत्र नास्ति चतुष्टयं ।

*Ind.* -ra, *V. sg.* *Ind.* vas, *Ptc. Fut. Pass.* *Ind.* *Ind.* as, 3 *sg.* -ya, *N. sg.*
There, O friend, not to be dwelt where not is a collection of the four,

ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ १०५ ॥

*Ttp.* -tṛi, *N. sg. m.* *Ind.* -ya, *N. sg.* *Ind.* -ya, *N. sg.* -la, *N. sg. f.* -dî, *N. sg.*
a creditor and, a physician and, a Brahman learned in the Vedas, full of water a river. (105)

ततो मामपि तत्र नय । अथ वायसस्तत्र

*Ind.* asmad, *Ac. sg.* *Ind.* *Ind.* nî, 2 *sg. Imp. Par.* *Ind.* -sa, *N. sg.* *Ind.*
Therefore me also there conduct. Then the crow there

तेन मित्रेण सह विचित्रालापैः सुखेन तस्य सरसः समीपं

tad, *I. sg. n.* -ra, *I. sg.* *Ind.* *Karm.* -pa, *I. pl.* -kha, *I. sg. n.* tad, *G. sg. n.* -ras, *G. sg.* -pa, *Ac. sg. n.*
that friend with, under various-conversations pleasantly of that lake into the proximity

ययौ । ततो मंथरो दूरादवलोक्य लघुपतनकस्य यथोचित-

yâ, 3 *sg. Perf. Par.* *Ind.* -ra, *N. sg.* -ra, *Ab. sg. n. Adv.* lok *with* ava, *Ger.* -ka, *G. sg.* *Avyay.*
went. Then Manthara from afar having seen, of Laghupatanaka as-proper

मातिथ्यं विधाय मूषिकस्यातिथिसत्कारं चकार ।

-ya, *Ac. sg.* dhâ, *with* vi, *Ger.* -ka, *G. sg.* *Ttp.* -ra, *Ac. sg.* kṛi, 3 *sg. Perf. Par.*

hospitality having performed, of the mouse hospitable-reception made.

यतः । बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।

*Ind.* -la, *N. sg.* *Ind.* *Ind.* *Ind.* -dha, *N. sg. m.* -an, *N. sg. m.* *Ind.* -ha, *Ac. sg.* gam *with* â, *N. sg. m. past Ptc. Pass.*

For, A child either, or an old man, a youth or to the house come,

तस्य पूजा विधातव्या सर्वत्राभ्यागतो गुरुः ॥ १०६ ॥

tad, *G. sg. m.* -jâ, *N. sg.* dhâ *with* vi, *N. sg. f. Ptc. Fut. Pass.* *Ind.* gam *with* abhi-â, *N. sg. m. past Ptc. Pass.* -ru, *N. sg. m.*

of him honour to be made; everywhere the arrived (guest) (is) an object of respect. (106)

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।

-ru, *N. sg. m.* -ni, *N. sg.* *Bahuv.* -ti, *G. pl.* -ṇa, *G. pl.* -ṇa, *N. sg.* -ru, *N. sg. m.*

An object of respect (is) fire for the twice-born, for the castes the Brâhman an object of respect;

पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः ॥ १०७ ॥

-ti, *N. sg.* -ka, *N. sg. m.* -ru, *N. sg. m.* -rî, *G. pl.* *Ind.* gam *with* abhi-â, *N. sg. m. past. Ptc. Pass.* -ru, *N. sg. m.*

the husband alone an object of respect for women; everywhere the arrived (guest) (is) an object of respect. (107)

वायसोऽवदत् । सखे मंथर सविशेषपूजामस्मै विधेहि

-sa, *N. sg.* vad, 3 *sg. Impf. Par.* -khi, *V. sg.* -ra, *V. sg.* *Karm.* -jâ, *Ac. sg.* idam, *D. sg. m.* dhâ *with* vi, 2 *sg. Imp. Par.*

The crow said: Friend Manthara, extraordinary-attention to him pay;

यतोऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यकनामा

*Ind.* idam, *N. sg. m.* *Bahuv.* -man, *G. pl. m.* -ṇa, *N. sg. m.* *Ttp.* -ra, *N. sg.* *Bahuv.* -man, *N. sg. m.*

for he of the pure-actions performing the leader, of gentleness-jewels-a mine, Hiraṇyaka-named,

मूषिकराजः । एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेनापि सर्पराजो न

*Ttp.* -ja, *N. sg.* etad, *G. sg. m.* *Ttp.* -ti, *Ac. sg.* *Ttp.* -ya, *I. sg.* *Ind.* *Ttp.* -ja, *N. sg.* *Ind.*

the mouse-king. Of him the virtue-praise with of tongues-two thousands even the serpent-king not

कदाचित्कथयितुं समर्थः स्यात् । इत्युक्त्वा चित्रग्रीवोपाख्यानं

*Ind.* kath, *Inf.* -tha, *N. sg. m.* as, 3 *sg. Pot.* *Ind.* vach, *Ger.* *Ttp.* -na, *Ac. sg.*

ever to relate able would be. Thus having said, of Chitragrîva-the tale

वर्णितवान् । मंथरः सादरं हिरण्यकं संपूज्याह । भद्र-

varṇ, *N. sg. m. Ptc. Perf. Par.* -ra, *N. sg.* *Avyay.* -ka, *Ac. sg.* pûj *with* sam, *Ger.* ah, 3 *sg. Perf Par.* -ra, *V. sg.*

(he) related. Manthara with-respect Hiraṇyaka having saluted says: My dear,

त्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि । हिरण्यको ऽवदत् । कथयामि ।

| | | | | | | |
|---|---|---|---|---|---|---|
| -tman, *G. sg.* | *Ttp.* -na, *Ac. sg.* | khyâ *with* â, *Inf.* | arh, 2 *sg. Pres. Par.* | -ka, *N. sg.* | vad, 3 *sg. Impf. Par,* | kath, 1 *sg. Pres. Par.* |
| of yourself | the desert-wood-approaching-reason | to tell | deign. | Hiraṇyaka | said: | I tell; |

श्रूयतां । अस्ति चंपकाभिधानायां नगर्यां परिव्राजकावसथः ।

| | | | | |
|---|---|---|---|---|
| śru, 3 *sg. Imp. Pass.* | as, 3 *sg. Pres. Par.* | *Bahuv.* -na, *L. sg. f.* | -rî, *L. sg.* | *Ttp.* -tha, *N. sg.* |
| it may be heard: | There is | in the Champaka-named | town | a mendicant-dwelling. |

तत्र चूडाकर्णो नाम परिव्राट् प्रतिवसति । स च

| | | | | | | |
|---|---|---|---|---|---|---|
| *Ind.* | *Bahuv.* -ṇa, *N. sg.* | -man, *Ac. sg. Adv.* | -vrâj, *N. sg.* | vas *with* prati, 3 *sg. Pres. Par.* | tad, *N. sg. m.* | *Ind.* |
| Therein | Chûdâkarṇa | by name | a mendicant | dwells. | He | and |

भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदंतके ऽवस्थाप्य

| | | | |
|---|---|---|---|
| *Ttp.* -ta, *Ac. sg. n.* | *Ttp.* -ra, *Ac. sg.* | *Ttp.* -ka, *L. sg.* | sthâ *with* ava, *Ger. Caus.* |
| with-the of the meals remaining-alms-food | the alms-dish | on a pin in the wall | having placed |

स्वपिति । अहं च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि । अनंतरं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| svap, 3 *sg. Pres. Par.* | asmad *N. sg.* | *Ind.* | *Ttp.* -na, *Ac. sg.* | plu *with* ud, *Ger.* | *Avyay.* | bhaksh 1 *sg. Pres. Par.* | *Ind.* |
| sleeps. | I | and | his-food, | having leaped up, | daily | eat. | Thereupon |

तस्य प्रियसुहृद्वीणाकर्णो नाम परिव्राजकः समायातः ।

| | | | | | |
|---|---|---|---|---|---|
| tad, *G. sg. m.* | *Karm.* -d, *N. sg.* | *Bahuv.* -ṇa, *N. sg.* | -man, *Ac. sg. Adv.* | -ka, *N. sg.* | yâ *with* sam-â, *N. sg. m. past Ptc. Pass.* |
| of him | the dear-friend | Vîṇâkarṇa | by name | a mendicant | came. |

तेन सह कथाप्रसंगावस्थितो मम त्रासार्थं जर्जरवंशखंडेन

| | | | | | |
|---|---|---|---|---|---|
| tad, *I. sg. m.* | *Ind.* | *Ttp.* -ta, *N. sg. m.* (*rt.* sthâ). | asmad, *G. sg.* | *Avyay.* | *Ttp.* -ḍa, *I. sg.* |
| Him | with | in conversation-engaged | of me | for frightening's sake | with a split-bamboo-piece |

चूडाकर्णो भूमिमताडयत् । वीणाकर्ण उवाच । सखे किमिति मम

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| *Bahuv.* -ṇa, *N. sg.* | -mi, *Ac. sg.* | tad, 3 *sg. Impf. Par.* | *Bahuv.* -ṇa, *N. sg.* | vach, 3 *sg. Perf Par.* | -khi, *V. sg.* | *Ind.* | *Ind.* | asmad, *G. sg.* |
| Chûḍâkarṇa | the ground | struck. | Vîṇâkarṇa | said: | Friend, | why | thus | of me |

कथाविरक्तो ऽन्यासक्तो भवान् । चूडाकर्णेनोक्तं ।

| | | | | |
|---|---|---|---|---|
| *Ttp.* -ta, *N. sg. m.* | *Ttp.* -ta, *N. sg. m.* | -vat, *N. sg. m.* | *Bahuv.* -ṇa, *I. sg.* | vach, *N. sg. n. past Pass. Ptc.* |
| the speech-neglecting | on something else-intent | you? | By Chûḍâkarṇa | said: |

मित्र नाहं विरक्तः किंतु पश्यायं मूषिको ममा-

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| -ra, *V. sg.* | *Ind.* | asmad, *N. sg.* | rañj *with* vi, *N. sg. m. past Ptc. Pass.* | *Ind.* | driś, 2 *sg. Imp. Par.* | idam, *N. sg. m.* | -ka, *N. sg.* | asmad, *G. sg.* |
| Friend, | not | I | absent; | but | look, | this | mouse | of me |

पकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य

-rin, *N. sg. m.* *Ind.* *Ttp.* -stha, *Ac. sg. n.* *Ttp.* -na, *Ac. sg.* plu *with* ud, *Ger.*

the plunderer always the in the dish-staying alms-food, leaping up,

भक्षयति । वीणाकर्णो नागदन्तकं विलोक्याह । कथं

bhaksh, 3 *sg. Pres. Par.* *Bahuv.* -ṇa, *N. sg.* *Ttp.* -ka, *Ac. sg.* lok *with* vi, *Ger.* ah, 3 *sg. Perf. Par.* *Ind.*

eats. Vîṇâkarṇa the pin in the wall having examined, says: How

मूषिकः स्वल्पबलो ऽप्येतावद्दूरमुत्पतति ।

-ka, *N. sg.* *Bahuv.* -la, *N. sg. m.* *Ind.* -vat, *Ac. sg. n.* -ra, *Ac, sg. n. Adv.* pat *with ud,* 3 *sg. Pres. Par.*

a mouse, of very-little-strength though, so far jumps up?

तदत्र केनापि कारणेन भवितव्यं । तथा चोक्तं ।

*Ind.* *Ind.* kim, *I. sg. n. Ind.* -ṇa, *I. sg.* bhû, *N. sg. n. Ptc. Fut. Pass.* *Ind.* *Ind.* vach, *N. sg. n. past. Ptc. Pass.*

Therefore here something the reason must be. Thus and said:

अकस्माद्युवती वृद्धं केशेष्वाकृष्य चुंबति ।

*Ind.* (kim, *Ab. sg. n.*) -van, *N. sg. f.* vṛidh, *Ac. sg. m. past Ptc. Pass.* -śa, *L. pl.* kṛish *with* â, *Ger.* chumb, 3 *sg. Pres. Par.*

Without-a why the young wife the old man by the hairs having drawn near kisses,

पतिं निर्दयमालिंग्य हेतुरत्र भविष्यति ॥ १०८ ॥

-ti, *Ac. sg.* *Avyay.* liṅg *with* â, *Ger.* -tu, *N. sg.* *Ind.* bhû, 3 *sg. Fut.* ii. *Par.*

the husband unmercifully having embraced, a reason here must be. (108)

चूडाकर्णः पृच्छति । कथमेतत् । वीणाकर्णः कथयति ।

*Bahuv.* -ṇa, *N. sg.* prachh, 3 *sg. Pres. Par.* *Ind.* etad, *N. sg. n.* *Bahuv.* -ṇa, *N. sg.* kath, 3 *sg. Pres. Par.*

Chûḍâkarṇa asks: How that? Vîṇâkarṇa relates:

अस्ति गौडीये कौशांबी नाम नगरी । तस्यां चंदनदासनामा

as, 3 *sg. Pres. Par.* -ya, *L. sg.* -bî, *N. sg.* -man, *Ac. sg. Adv.* -rî, *N. sg.* tad, *L. sg. f.* *Bahuv.* -man, *N. sg. m*

There is in Gaur Kauśâmbî by name a town. Therein Chandanadâsa-named

वणिग्महाधनो निवसति । तेन पश्चिमे वयसि वर्तमानेन

-ṇij, *N. sg.* *Bahuv.* -na, *N. sg. m.* vas *with* ni, 3 *sg. Pres. Par.* tad, *I. sg. m.* -ma, *L. sg. n.* -yas, *L. sg.* vṛit, *I. sg. Ptc. Pres. Âtm.*

a merchant of great-wealth lives. By him, in the last stage of life being,

कामाधिष्ठितचेतसा धनदर्पाल्लीलावती नाम

*Bahuv.* -tas, *I. sg. m.* *Ttp.* -pa, *Ab. sg.* -tî, *N. sg.* -man, *Ac. sg. Adv.*

having the mind-possessed-by love, from wealth-pride Lîlâvatî by name

वणिक्पुत्री परिणीता । सा च मकरकेतोर्विजयवैजयं-

Tp. -ri, N. sg. ni with pari, N. sg. f. past Ptc. Pass. tad, N. sg. f. Ind. Bahuv. -tu, G. sg. m. Tp. -ti, N. sg.

a merchant's-daughter wedded. She and of the God of Love the victory-banner

तीव यौवनवती बभूव । स च वृद्धपतिस्तस्याः संतोषाय

Ind. -vat, N. sg. f. bhû, 3 sg. Perf. Par. tad, N. sg. m. Ind. Karm. -ti, N. sg. tad, G. sg. f. -sha, D. sg.

like youthful was. That and old-husband of her to the satisfaction

नाभवत् ।

Ind. bhû, 3 sg. Impf. Par.

not was.

यतः । शशिनीव हिमार्तानां घर्मार्तानां रवाविव ।

Ind. -śin, L. sg. m. Ind. Tp. -ta, G. pl. m. Tp. -ta, G. pl. m. -vi, L. sg. Ind.

For, In the moon as of the cold-pained, of the heat-oppressed in the sun as,

मनो न रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ ॥ १०९ ॥

-nas, N. sg. Ind. ram, 3 sg. Pres. Âtm. -ri, G. pl. Bahuv. -ya, L. sg. m. -ti, L. sg.

the mind not delights of women in a by old age-impaired-senses possessing husband. (109)

अन्यच्च । पलितेष्वपि दृष्टेषु पुंसः का नाम कामिता ।

-ya, N. sg. n. Ind. -ta, L. pl. n. Ind. dris, L. pl. n. past Ptc. Pass. -ms, G. sg. kim, N. sg. f. -man, Ac. sg. Adv. -tâ, N. sg.

Again and, Grey hairs already being seen, of a man what ever lovership?

भैषज्यमिव मन्यंते यदन्यमनसः स्त्रियः ॥ ११० ॥

-ya, Ac. sg. Ind. man, 3 pl. Pres. Âtm. Ind. Bahuv. -nas, N. pl. f. -ri, N. pl.

a drug like they consider, since having others-in their hearts women. (110)

स च वृद्धपतिस्तस्यामतीवानुरागवान् ।

tad, N. sg. m. Ind. Karm. -ti, N. sg. tad, L. sg. f. Ind. -vat, N. sg. m.

That and old-husband of her exceedingly fond;

यतः । धनाशा जीविताशा च गुर्वी प्राणभृतां सदा ।

Ind. Tp. -śâ, N. sg. Tp. -śâ, N. sg. Ind. -ru, N. sg. f. Tp. -t, G. pl. m. Ind.

For, Wealth-hope, life-hope and, dear of the living beings always,

वृद्धस्य तरुणी भार्या प्राणेभ्यो ऽपि गरीयसी ॥ १११ ॥

vridh, G. sg. m. past Ptc. Pass. -ṇa, N. sg. f. -yâ, N. sg. -ṇa, Ab. pl. Ind. -ru, N. sg. f. Compar.

of an old man a youthful wife than life even dearer. (111)

नोपभोक्तुं न च त्यक्तुं शक्नोति विषयाञ्जरी ।

Ind. bhuj with upa, Inf. Ind. Ind. tyaj, Inf. śak, 3 sg. Pres. Par. -ya, Ac. pl. -rin, N. sg. m.

Not enjoy, not and give up can the objects of sense an old man,

अस्थि निर्दशनः श्वेव जिह्वया लेढि केवलं ॥ ११२ ॥

thi, *Ac. sg.* *Bahuv.* -na, *N. sg. m.* śvan, *N. sg.* *Ind.* -vâ, *I. sg.* lih, 3 *sg. Pres.P.* -la, *Ac. sg. n.*
the bone a toothless dog as with the tongue licks merely. (112)

अथ सा लीलावती यौवनदर्पादतिक्रांतकुलमर्यादा केनापि

*Ind.* tad, *N. sg. f.* -tî, *N. sg.* *Ttp.* -pa, *Ab. sg.* *Bahuv.* -da, *N. sg. f.* kim, *I. sg. m. Ind.*
Now that Lîlâvatî through youth-pride having transgressed-of her family-the bounds some

वणिक्पुत्रेण सहानुरागवती बभूव ॥

*Ttp.* -ra, *I. sg.* *Ind.* -vat, *N. sg. f.* bhû, 3 *sg. Perf. Par.*
merchant's-son with in love was.

यतः । स्वातंत्र्यं पितृमंदिरे निवसतिर्यात्रोत्सवे संगतिः

*Ind.* -ya, *N. sg.* *Ttp.* -ra, *L. sg.* -ti, *N. sg.* *Ttp.* -va, *L. sg.* -ti, *N. sg.*
For, Independence, in the father's-house residing, at a public-festival attendance,

गोष्ठीपूरुषसंनिधावनियमो वासो विदेशे तथा ।

*Ttp.* -dhi, *L. sg.* -ma, *N. sg.* -sa, *N. sg.* -śa, *L. sg.* *Ind.*
of a company-in the presence want of-restraint, living in a strange-place and,

संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः

-ga, *N. sg.* *Ind.* -lî, *I. pl.* *Ind.* -ti, *G. sg.* -ja, *G. sg. f.* -ti, *N. sg.*
associating with wanton women, repeatedly of the livelihood, of her own, waste,

पत्युर्वार्धकमीर्षितं प्रवसनं नाशस्य हेतुः स्त्रियाः ॥ ११३ ॥

-ti, *G. sg.* -ka, *N. sg.* -ta, *N. sg.* -na, *N. sg.* -śa, *G. sg.* -tu, *N. sg.* -rî, *G. sg.*
of the husband old age, jealousy, sojourn abroad, of the ruin the cause of a woman. (113)

अपरं च । पानं दुर्जनसंसर्गः पत्या च विरहोऽटनं ।
-ra, *N. sg. n.* *Ind.* -na, *N. sg.* *Ttp.* -ga, *N. sg.* -ti, *I. sg.* *Ind.* -ha, *N. sg.* -na, *N. sg.*
Another and, Drinking, with wicked-associating, from the husband and separation, roaming about,

स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥ ११४ ॥

-na, *N. sg.* *Ind.* *Ttp.* -ha, *L. sg.* -sa, *N. sg.* -rî, *G. pl.* -ṇa, *N. pl.* shash, *N.*
Sleeping and, in another's-house dwelling, of women injurious things six. (114)

स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः ।

-na, *N. sg.* *Ind.* as, 3 *sg. Pres. Par.* -ṇa, *N. sg.* *Ind.* as, 3 *sg. Pres. Par.* *Ind.* as, 3 *sg. Pres. Par.* -tri, *N. sg. m.* -ra, *N. sg.*
A place not there is, a moment not there is, not there is a soliciting man,

तेन नारद नारीणां सतीत्वमुपजायते ॥ ११५ ॥

tad, *I. sg. n. Adv.* -da, *V. sg.* -rî, *G. pl.* -tva, *N. sg.* jan *with* upa, 3 *sg. Pres. Âtm.*

therefore, O Nârada, of women chastity is produced. (115)

न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते ।

*Ind.* -rî, *G. pl.* *Karm.* -ya, *N. sg. m.* kim-chid, *N. sg. m.* -ya, *N. sg. m.* *Ind.* *Ind.* *Ind.* vid, 3 *sg. Pres. Pass.*

Not of women disliked anyone, liked or also not is known,

गावस्तृणमिवारण्ये प्रार्थयंति नवं नवं ॥ ११६ ॥

go, *N. pl.* -ṇa, *Ac. sg.* *Ind.* -ya, *L. sg.* arth *with* pra, 3 *pl. Pres. Par.* -va, *Ac. sg. m.*

cows grass as in a wood, they seek a new, a new one. (116)

अपरं च । घृतकुंभसमा नारी तप्तांगारसमः पुमान् ।

-ra, *N. sg. n.* *Ind.* *Ttp.* -ma, *N. sg. f.* -rî, *N. sg.* *Ttp.* -ma, *N. sg. m.* puṁs, *N. sg.*

Again and, Butter-pot-like the woman, burning-coal-like the man,

तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ॥ ११७ ॥

tad, *Ab. sg. n. Adv.* -ta, *Ac. sg.* *Ind.* -ni, *Ac. sg.* *Ind.* *Ind.* *Ind.* sthâ, 3 *sg. Pot. Par. Caus.* -dha, *N. sg. m.*

therefore butter and fire and not together should put a sage. (117)

न लज्जा न विनीतत्वं न दाक्षिण्यं न भीरुता ।

*Ind.* -jâ, *N. sg.* *Ind.* -tva, *N. sg.* *Ind.* -ya, *N. sg.* *Ind.* -tâ, *N. sg.*

Not shame, not modesty, not regard, not fear,

प्रार्थनाभाव एवैकं सतीत्वे कारणं स्त्रियाः ॥ ११८ ॥

*Ttp.* -va, *N. sg.* *Ind.* -ka, *N. sg. n.* -tva, *L. sg.* -ṇa, *N. sg.* -rî, *G. sg.*

of asking-the want merely the only for the chastity cause of a woman. (118)

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।

-tṛi, *N. sg.* raksh, 3 *sg. Pres. Par.* -ra, *L. sg.* -tṛi, *N. sg.* raksh, 3 *sg. Pres. Par.* -na, *L. sg.*

The father guards in infancy, the husband guards in youth,

पुत्रश्च स्थाविरे भावे न स्त्री स्वातंत्र्यमर्हति ॥ ११९ ॥

-ra, *N. sg.* *Ind.* -ra, *L. sg. m.* -va, *L. sg.* *Ind.* -rî, *N. sg.* -ya, *Ac. sg.* arh, 3 *sg. Pres. Par.*

the son and in old state of life; not woman independence deserves. (119)

एकदा सा लीलावती रत्नावलीकिरणकर्बुरे पर्यंके तेन वणिक्पुत्रेण

*Ind.* tad, *N. sg. f.* -tî, *N. sg.* *Ttp.* -ra, *L. sg. m.* -ka, *L. sg.* tad, *I. sg. m.* *Ttp.* -ra, *I. sg.*

One day that Lîlâvatî on a with gem-string-lustre-variegated couch that merchant-son

सह विश्रंभालापैः सुखासीना तमलक्षितोपस्थितं

*Ind.* *Ttp.* -pa, *I. pl.* *Karm.* -na, *N. sg. f.* (*rt.* âs) tad, *Ac. sg. m.* *Karm.* -ta, *Ac. sg. m.*

with in confidence-talks pleasantly-seated that unobserved-approached

पतिमवलोक्य सहसोत्थाय केशेष्वाकृष्य

-ti, *Ac. sg.* lok *with* ava, *Ger.* -has, *I. sg.* sthâ *with* ud, *Ger.* -śa, *L. pl.* krish *with* â, *Ger.*

husband having perceived, suddenly having risen, by the hairs having drawn,

गाढमालिंग्य चुंबितवती । तेनावसरेण जारश्च पलायितः ।

-ḍha, *Ac. sg. n. Adv.* liṅg *with* â, *Ger.* chumb, *N. sg. f. Ptc. Perf. Par.* tad, *I. sg. m.* -ra, *I. sg.* -ra, *N. sg.* *Ind.* ay *with* palâ.

ardently having embraced kissed. By that opportunity the lover and escaped.

उक्तं च । उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।

vach, *N. sg. n. past Ptc. Pass.* *Ind.* -nas, *N. sg.* vid, 3 *sg. Perf. Par.* yad, *Ac. sg. n.* -ra, *Ac. sg.* yad, *Ac. sg. n.* *Ind.* vid, 3 *sg. Perf. Par.* *Ttp.* -ti, *N. sg.*

Said and, Uśanas knows what science, what and knows Vrihaspati,

स्वभावेनैव तच्छास्त्रं स्त्रीबुद्धौ सुप्रतिष्ठितं ॥ १२० ॥

*Karm.* -va, *I. sg.* *Ind.* tad, *N. sg. n.* -ra, *N. sg.* *Ttp.* -dhî, *L. sg.* *Karm.* -ta, *N. sg. n.*

by nature already that science in a woman's mind is well-implanted. (120)

तदालिंगनमवलोक्य समीपवर्तिनी कुट्टन्यचिंतयत् ।

*Ttp.* -na, *Ac. sg.* lok *with* ava, *Ger.* *Ttp.* -tin, *N. sg. f.* -nî, *N. sg.* chint, 3 *sg. Impf. Par.*

Of him-the embracing having seen near-being a procuress thought:

अकस्मादियमेनमुपगूढवतीति । ततस्तया

*Ind.* (kim, *Ab. sg. n.*) idam, *N. sg. f.* etad, *Ac. sg. m.* guh *with* upa, *N. sg. f. Ptc. Perf. Par.* *Ind.* *Ind.* tad, *I. sg. f.*

'Without-a why this woman him embraced,' thus. Thereupon by that

कुट्टन्या तत्कारणं परिज्ञाय सा लीलावती गुप्तेन

-nî, *I. sg.* *Ttp.* -ṇa, *Ac. sg.* jñâ *with* pari, *Ger.* tad, *N. sg. f.* -tî, *N. sg.* gup, *I. sg. m. past Ptc. Pass.*

procuress of it-the reason having discovered that Lîlâvatî with a secret (fine)

दंडिता । अतोऽहं ब्रवीमि । अकस्माद्युवती वृद्धमि-

daṇḍ, *N. sg. f. past Ptc. Pass.* *Ind.* asmad, *N. sg.* brû, 1 *sg. Pres. Par.* *Ind.* (kim, *Ab. sg. n.*) -van, *N. sg. f.* -dha, *Ac. sg. m.*

punished. Therefore I say: without-a why the young woman the old man,

त्यादि । मूषिकबलोपष्टंभेन केनापि कारणेनात्र भवितव्यं ।

*Bahuv.* -di, *Ac. sg. n.* *Ttp.* -bha, *I. sg.* kim, *I. sg. m.* *Ind.* -ṇa, *I. sg.* *Ind.* bhû, *N. sg. n. Ptc. Fut. Pass.*

etc. Mouse-strength-support some the cause here must be.

क्षणं विचिंत्य परिव्राजकेनोक्तं । कारणं चात्र

-ṇa, *Ac. sg.* chint *with* vi, *Ger.* -ka, *I. sg.* vach, *N. sg. n. past Ptc. Pass.* -ṇa, *N. sg.* *Ind.* *Ind.*

A moment having reflected, by the mendicant said: The reason and here

धनबाहुल्यमेव भविष्यति ।

*Ttp.* -ya, *N. sg.* *Ind.* bhû, 3 *sg. Fut.* ii. *Par.*

wealth-abundance only will be;

यतः । धनवान्बलवाँल्लोके सर्वः सर्वत्र सर्वदा ।

*Ind.* -vat, *N. sg. m.* -vat, *N. sg. m.* -ka, *L. sg.* -va, *N. sg. m.* *Ind.* *Ind.*

For, The wealthy strong in the world every one, everywhere, at every time,

प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥ १२१ ॥

-tva, *N. sg.* *Bahuv.* -la, *N. sg. n.* *Ind.* -jan, *G. pl.* *Ind.* jan *with* upa, 3 *sg. Pres. Âtm.*

the superiority on riches-founded for of kings also is produced. (121)

ततः खनित्रमादाय तेन विवरं खनित्वा चिरसंचितं

*Ind.* -ra, *Ac. sg.* dâ *with* â, *Ger.* tad, *I. sg. m.* -ra, *Ac. sg.* khan, *Ger.* *Karm.* -ta, *N. sg. n.*

Then a spade having taken, by him the hole having dug open, long-amassed

मम धनं गृहीतं । ततः प्रभृति निजशक्तिहीनः सत्त्वोत्साहरहितः

asmad, *G. Sg.* -na, *N. sg.* grah, *N. sg. n. past Ptc. Pass.* *Ind.* *Ind.* *Ttp.* -na, *N. sg. m.* (*rt.* hâ) *Ttp.* -ta, *N. sg. m.*

of me wealth was taken. Thence-forward of my-strength-forsaken, of vigour-energy-deprived,

स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मंदं मंदमुपसर्पञ्चू-

*Karm.* -ra, *Ac. sg.* *Ind.* pad *with* ud, *Inf. Caus.* *Karm.* -ma, *N. sg. m.* *Avyay.* -da, *Ac. sg. n. Adv.* srip *with* upa, *N. sg. m. Ptc. Pres. Par.*

my own-food even to procure unable with-fear slowly slowly creeping-on

डाकर्णेनावलोकितः । ततस्तेनोक्तं ।

-ṇa, *I. sg.* lok *with* ava, *N. sg. m. past Ptc. Pass.* *Ind.* tad, *I. sg. m.* vach, *N. sg. n. past Ptc. Pass.*

by Chûḍâkarṇa (I was) perceived. Then by him said:

धनेन बलवाँल्लोके धनाद्भवति पंडितः ।

-na, *I. sg.* -vat, *N. sg. m.* -ka, *L. sg.* -na, *Ab. sg.* bhû, 3 *sg. Pres. Par.* -ta, *N. sg. m.*

With wealth strong in the world, through wealth one is wise,

पश्यैतं मूषिकं पापं स्वजातिसमतां गतं ॥ १२२ ॥

dṛiś, 2 *sg. Imp. Par.* etad, *Ac. sg. m.* -ka, *Ac. sg.* -ra, *Ac. sg. m.* *Ttp.* -tâ, *Ac. sg.* gam, *Ac. sg. m. past Ptc. Pass.*

Behold that mouse wretched of his own-species-to the level gone. (122)

किंच । अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः ।

*Ind.* -tha, *I. sg.* *Ind.* hâ *with* vi, *G. sg. m. past Ptc. Pass.* -sha, *G. sg.* *Bahuv.* -dhas, *G. sg. m.*

Moreover, By wealth but of a forsaken man, (as) of one with little-judgment,

क्रियाः सर्वा विनश्यंति ग्रीष्मे कुसरितो यथा ॥ १२३ ॥

-yâ, *N. pl.* -va, *N. pl. f.* naś *with* vi, 3 *pl. Pres. Par.* -ma, *L. sg.* *Karm.* -t, *N. pl.* *Ind.*
the actions all disappear, in summer little-rivers as. (123)

अपरं च। यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बांधवाः।

-ra, *N. sg. n.* *Ind.* yad, *G. sg. m.* -tha, *N. pl.* tad, *G. sg. m.* -ra, *N. pl.* yad, *G. sg. m.* -tha, *N. pl.* tad, *G. sg. m.* -va, *N. pl.*
Another and, Of whom wealth, of him friends, of whom wealth, of him relations,

यस्यार्थाः स पुमांल्लोके यस्यार्थाः स हि पंडितः ॥ १२४ ॥

yad, *G. sg. m.* -tha, *N. pl.* tad, *N. sg. m.* pums, *N. sg.* -ka, *L. sg.* yad, *G. sg. m.* -tha, *N. pl.* tad, *N. sg. m.* *Ind.* -ta, *N. sg. m.*
of whom wealth, he a man in the world, of whom wealth, he indeed wise. (124)

अन्यच्च। अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च।

-ya, *N. sg. n.* *Ind.* *Bahuv.* -ra, *G. sg. m.* -ha, *N. sg.* -ya, *N. sg. n.* *Ttp.* -ta, *G. sg. m.* *Ind.*
Again and, Of a son-less the house empty, of one of a good-friend-destitute and,

मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता ॥ १२५ ॥

-kha, *G. sg. m.* *Ind.* -ś. *N. pl.* -ya, *N. pl. f.* *Karm.* -ya, *N. sg. f.* -tâ, *N. sg.*
of a fool and the regions empty, all-empty poverty. (125)

अपरं च। तानींद्रियाण्यविकलानि तदेव नाम

-ra, *N. sg. n.* *Ind.* tad, *N. pl. n.* -ya, *N. pl.* *Karm.* -la, *N. pl. n.* tad, *N. sg. n.* *Ind.* -man, *N. sg.*
Another and, 'Those senses unimpaired, that same name,

सा बुद्धिरप्रतिहता वचनं तदेव।

tad, *N. sg. f.* -dhi, *N. sg.* *Karm.* -ta, *N. sg. f.* -na, *N. sg.* tad, *N. sg. n.* *Ind.*
that intellect uninjured, language that same,

अर्थोष्मणा विरहितः पुरुषः स एव

*Ttp.* -man, *I. sg.* rah *with* vi, *N. sg. m. past Ptc. Pass.* -sha, *N. sg.* tad, *N. sg. m.* *Ind.*
by the wealth-heat forsaken man that same

अन्यः क्षणेन भवतीति विचित्रमेतत् ॥ १२६ ॥

-ya, *N. sg. m.* -na, *I. sg.* bhû, 3 *sg. Pres Par.* *Ind.* -tra *N. sg. n.* etad, *N. sg. n.*
another in a moment is;' thus strange this. (126)

एतत्सर्वमाकर्ण्य मयालोचितं। ममात्रावस्थानमयुक्तमिदानीं

This all having heard by me considered: Of me here staying improper now,

यच्चान्यस्मा एतद्वृत्तांतकथनं तदप्यनुचितं।

what and to another of these-affairs-communication, that also improper.

यतः। अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
For, Fortune-loss, of mind-distress, at home malpractices and,

वंचनं चापमानं च मतिमान्न प्रकाशयेत्॥ १२७॥
the being cheated and, the being slighted and, the wise not should make public. (127)

अपि च। आयुर्वित्तं गृहच्छिद्रं मंत्रमैथुनभेषजं।
Also and, Age, wealth, at home-trouble, design-love-medicine,

तपोदानापमानं च नव गोप्यानि यत्नतः॥ १२८॥
penance-liberality-dishonour and, nine (things) to be concealed carefully. (128)

तथा चोक्तं। अत्यंतविमुखे दैवे व्यर्थे यत्ने च पौरुषे।
Thus and said, Very-averse (being) fortune, in vain the exertion and human,

मनस्विनो दरिद्रस्य वनादन्यत्कुतः सुखं॥ १२९॥
of the wise poor, (different) from the forest other whence comfort? (129)

अन्यच्च। मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति।
Again and, The wise dies rather, to misery not but he goes,

अपि निर्वाणमायाति नानलो याति शीततां॥ १३०॥
even to extinction goes, not fire goes to coldness. (130)

किंच। कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः।
Moreover, Of a flower-cluster as, two conditions forsooth of the wise,

सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येदथवा वने॥ १३१॥
of all at the head either he may stand, he may fade away or in a forest. (131)

यच्चात्रैव याच्ञया जीवनं तदतीव गर्हितं।
What and here just through begging living, that exceedingly reprobated.

यतः। वरं विभवहीनेन प्राणैः संतर्पितोऽनलः।
For, Better by one of wealth-deprived with the life satiated a fire,

नोपचारपरिभ्रष्टः कृपणः प्रार्थितो जनः॥ १३२॥
not an of civility-destitute miserly solicited person. (132)

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्त्वात्परिभ्रश्यते

From poverty to shame one goes, shame-laden of strength one is deprived,

निःसत्त्वः परिभूयते परिभवान्निर्वेदमापद्यते ।

strengthless one is oppressed, from oppression into despondency one falls,

निर्विण्णः शुचमेति शोकनिहतो बुद्ध्या परित्यज्यते

the despondent to sorrow goes, the sorrow-stricken by reason is forsaken,

निर्बुद्धिः क्षयमेत्यहो विधनता सर्वापदामास्पदं ॥ १३३ ॥

the reason-less to destruction goes, Oh, poverty of all-evils the foundation. (133)

किंच । वरं मौनं कार्यं न च वचनमुक्तं यदनृतं

Moreover, Better silence to be observed, not and a word spoken, which untrue,

वरं क्लैव्यं पुंसां न च परकलत्राभिगमनं ।

better impotence of men, not and with another's-wife-intercourse,

वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचिः

better life-abandonment, not and in calumnious-words delight,

वरं भिक्षाशित्वं न च परधनास्वादनसुखं ॥ १३४ ॥

better alms-eating, not and another's-wealth-tasting-pleasure. (134)

वरं शून्या शाला न च खलु वरो दुष्टवृषभः

Better an empty stable, not and by any means better a vicious-bull,

वरं वेश्या पत्नी न पुनरविनीता कुलवधूः ।

better a wanton (as) wife, not but an ill-mannered noble-wife,

वरं वासो ऽरण्ये न पुनरविवेकाधिपपुरे

better dwelling in a wood, not but in an undiscriminating-ruler's-town,

वरं प्राणत्यागो न पुनरधमानामुपगमः ॥ १३५ ॥

better life-abandonment, not but of low persons society. (135)

अपि च । सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यं ।

Also and, Servitude as respect totally, moonlight as darkness, old age as loveliness,

हरिहरकथैव दुरितं गुणशतमप्यर्थिता हरति ॥ १३६ ॥

of Hari (and) -Hara- legend as sin, of virtues-a hundred even beggary takes away. (136)

इति विमृश्य तत्किमहं परपिंडेनात्मानं पोषयामि ।

Thus having reflected, then why I with another's-cake myself nourish?

कष्टं भोः । तदपि द्वितीयं मृत्युद्वारं ।

Oh, the misery! That even a second death-gate.

यतः । पल्लवग्राहि पांडित्यं क्रयक्रीतं च मैथुनं ।

For, Buds gathering (superficial) wisdom, with money-purchased and love,

भोजनं च पराधीनं तिस्रः पुंसां विडंबनाः ॥ १३७ ॥

subsistence and on another-depending, three of men afflictions. (137)

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।

The sick, the long-exiled, the another's-bread-eating, in another's-house-living,

यज्जीवति तन्मरणं यन्मरणं सो ऽस्य विश्रामः ॥ १३८ ॥

what he lives, that death; what death, that of him the deliverance. (138)

इत्यालोच्यापि लोभात्पुनरप्यर्थं ग्रहीतुं ग्रहमकरवं ।

Thus having considered also, from desire again even wealth to acquire taking away I made.

तथा चोक्तं । लोभेन बुद्धिश्चलति लोभो जनयते तृषां ।

Thus and said, Through desire reason departs, desire produces covetousness,

तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥ १३९ ॥

by covetousness-tormented pain experiences hereafter here and a man. (139)

ततो ऽहं मंदं मंदमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंशखंडेन

Then I slowly slowly creeping-on, by that Viṇâkarṇa with a split-bamboo piece

ताडितश्चाचिंतयं ।

beaten and, reflected:

धनलुब्धो ह्यसंतुष्टो ऽनियतात्माजितेंद्रियः ।

The wealth-desirous indeed discontented, of unrestrained-mind, of unsubdued-senses;

सर्वा एवापदस्तस्य यस्य तुष्टं न मानसं ॥ १४० ॥

all verily misfortunes of him, whose content not mind. (140)

तथा च। सर्वाः संपत्तयस्तस्य संतुष्टं यस्य मानसं।

Thus and, All kinds of happiness of him, content of whom the mind;

उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ १४१ ॥

of him whose foot-is covered-with a shoe is not with leather-covered as it were the earth? (141)

अपरं च। संतोषामृततृप्तानां यत्सुखं शांतचेतसां।

Another and, Of the with the contentment-nectar-satiated what happiness of the placid-minded,

कुतस्तद्धनलुब्धानामितश्चेतश्च धावतां ॥ १४२ ॥

whence that of the wealth-desirous hither and thither running? (142)

किंच। तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं।

Moreover, By him read, heard by him, by him everything accomplished,

येनाशाः पृष्ठतः कृत्वा नैराश्यमवलंबितं ॥ १४३ ॥

by whom, hopes behind the back having placed, hope-freedom depended upon. (143)

अपि च। असेवितेश्वरद्वारमदृष्टविरहव्यथं।

Also and, Not having served-a master's-door, not having perceived-separation-pain,

अनुक्तक्लीववचनं धन्यं कस्यापि जीवनं ॥ १४४ ॥

not having uttered-an unmanly-word, happy of any man the life. (144)

यतः। न योजनशतं दूरं बाध्यमानस्य तृष्णया।

By, Not a yojana-hundred far for one stricken with covetousness,

संतुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥ १४५ ॥

of the contented for the to hand-come even treasure is not regard. (145)

तदत्रावस्थोचितकार्यपरिच्छेदः श्रेयान्।

Therefore here of (my) situation-suiting-action-discrimination better.

को धर्मो भूतदया किं सौख्यमरोगिता जगति जंतोः ।

What religion? for the living-compassion. What happiness? health in the world of man.

कः स्नेहः सद्भावः किं पांडित्यं परिच्छेदः ॥ १४६ ॥

What love? a noble-state of mind. What wisdom? discrimination. (146)

तथा च । परिच्छेदो हि पांडित्यं यदापन्ना विपत्तयः ।

Thus and, Discrimination indeed wisdom, when approached misfortunes

अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे ॥ १४७ ॥

of the without-discrimination-acting misfortunes will be at step at step. (147)

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।

One should give up one for a family's-sake, for a village's-sake a family one should give up;

ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ॥ १४८ ॥

a village for the country's-sake, for one's self's-sake the earth one should give up. (148)

अपरं च । पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरं ।

Again and, Water either without-exertion, sweet food or with danger-attended,

विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥ १४९ ॥

having deliberated indeed I see, that happiness where ease. (149)

इत्यालोच्याहं निर्जनवनमागतः ।

Thus having considered I the lonely-wood approached.

यतः । वरं वनं व्याघ्रगजेंद्रसेवितं द्रुमालयः पक्वफलांबुभोजनं ।

For, Better a wood by tigers-(and) elephants-haunted, a tree-habitation on ripe-fruits-(and)water-living,

तृणानि शय्या परिधानवल्कलं न बंधुमध्ये धनहीनजीवनं ॥ १५० ॥

grass for a bed, a garment-(of) bark, not of friends-in the midst of one of wealth-deprived-the living. (150)

ततोऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्या-

Afterwards, through my-fortune's-(i.e. good works) rise (i.e. reward) by this friend I with affection-continuity

नुगृहीतः । अधुना च पुण्यपरंपरया भवदाश्रयः स्वर्ग एव मया प्राप्तः ।

favoured. Now and by fortune-continuation of you-the company, a paradise verily, by me found.

यतः । संसारविषवृक्षस्य द्वे अत्र रसवत्फले ।
For, Of the world's-poison-tree two here delicious-fruits,

काव्यामृतरसास्वादः संगमः सुजनैः सह ॥ १५१ ॥
the poem-nectar-flavour-tasting, association good-men with. (151)

मंथर उवाच । अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं
Manthara said: Riches on the feet-the dust-resembling, mountain-rivers-fleetness-like youth,

आयुष्यं जलबिंदुलोलचपलं फेनोपमं जीवितं ।
vital strength as a water-drop-trembling-unsteady, froth-like life;

धर्मं यो न करोति निंदितमतिः स्वर्गार्गलोद्घाटनं
virtue who not practises base-minded, the heaven-bar-unbolting,

पश्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते ॥ १५२ ॥
afterwards repentance-seized, by old age-overpowered, with the sorrow-fire is burnt. (152)

युष्माभिरतिसंचयः कृतस्तस्यायं दोषः । शृणु ।
By you too much-accumulation made; of it this the fault (i.e. cause); Listen:

उपार्जितानां वित्तानां त्याग एव हि रक्षणं ।
Of accumulated riches giving away only indeed the preservation;

तडागोदरसंस्थानां परीवाह इवांभसां ॥ १५३ ॥
of the in a pond's-interior-standing a drain as of waters. (153)

अन्यच्च । यदधो ऽधः क्षितौ वित्तं निचखान मितंपचः ।
Again and, When low low in the ground wealth has buried the miser,

तदधोनिलयं गंतुं चक्रे पंथानमग्रतः ॥ १५४ ॥
then to a mansion below to go he has made himself a path beforehand. (154)

अन्यच्च । निजसौख्यं निरुंधानो यो धनार्जनमिच्छति ।
Again and, His own-happiness opposing who wealth-acquisition wishes,

परार्थे भारवाहीव क्लेशस्यैव हि भाजनं ॥ १५५ ॥
for another's-sake a burthen-bearer as, of pain merely indeed a vessel. (155)

अपरं च । दानोपभोगहीनेन धनेन धनिनो यदि ।

Another and, Through of liberality-(and) enjoyment-deprived riches rich if (we are),

पृथ्वीखातनिखातेन धनेन धनिनो वयं ॥ १५६ ॥

through the in the earth-caverns-buried riches rich we. (156)

अन्यच्च । असंभोगेन सामान्यं कृपणस्य धनं परैः ।

Again and, Through non-enjoyment common of a miser the wealth with others,

अस्येदमिति संबंधो हानौ दुःखेन गम्यते ॥ १५७ ॥

'of him this' thus the connection at the loss by pain is ascertained. (157)

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यं ।

Liberality by kind-words-accompanied, knowledge without-conceit, with clemency-endowed heroism,

वित्तं त्यागनियुक्तं दुर्लभमेतच्चतुर्भद्रं ॥ १५८ ॥

wealth with liberality-connected, difficult-to be found these four-good things. (158)

उक्तं च । कर्तव्यः संचयो नित्यं कर्तव्यो नातिसंचयः ।

Said and, To be made accumulation constantly, to be made not exceeding-accumulation,

पश्य संचयशीलोऽसौ धनुषा जंबुको हतः ॥ १५९ ॥

behold, accumulation-practising that by a bow jackal slain. (159)

तावाहतुः । कथमेतत् । मंथरः कथयति । आसीत्कल्याणकटक-

Those two say: How that? Manthara relates: There was of Kalyâṇa-kaṭaka-

वास्तव्यो भैरवो नाम व्याधः । स चैकदा मृगमन्विष्यमाणो

an inhabitant, Bhairava by name, a hunter. He and one day a deer pursuing

विंध्याटवीं गतवान् । ततस्तेन व्यापादितं मृगमादाय

to the Vindhya-forest went. Afterwards by him the killed deer having taken up

गच्छता घोराकृतिः शूकरो दृष्टः । तेन व्याधेन मृगं भूमौ

going, of formidable-appearance a boar seen. By that hunter the deer upon the ground

निधाय शूकरः शरेणाहतः । शूकरेणापि घनघोरगर्जनं

having laid, the boar with an arrow hit. By the boar in turn as of clouds-a terrible-roar

कृत्वा स व्याधो मुष्कदेशे हतः संछिन्नद्रुम इव

having made that hunter in the groin wounded being a cut-tree like

भूमौ निपपात ।

on the ground fell-down.

यतः । जलमग्निं विषं शस्त्रं क्षुद्व्याधी पतनं गिरेः ।

For, Water, fire, poison, a weapon, hunger-illness, falling from a rock,

निमित्तं किंचिदासाद्य देही प्राणैर्विमुच्यते ॥ १६० ॥

a cause (i.e. accident) of some kind having encountered the corporeal being of life is deprived. (160)

अथ तयोः पादास्फालनेन सर्पोऽपि मृतः । अथानंतरं

Then of them through the feet-trampling a serpent also killed. Now thereupon

दीर्घरावो नाम जंबुकः परिभ्रमन्नाहारार्थी तान्मृतान्

Dîrgharâva by name, a jackal, roaming-about, food-seeking, those dead

मृगव्याधसर्पशूकरानपश्यदचिंतयच्च । अहो अद्य महद्भोज्यं मे

deer-hunter-serpent-boar saw, reflected and: Oh! to-day a great meal of me

समुपस्थितं । अथवा ।

fallen in the way. However,

अचिंतितानि दुःखानि यथैवायांति देहिनां ।

Unthought-of troubles as just happen to men,

सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ १६१ ॥

blessings also thus, I think; fate in this plays the chief part. (161)

तद्भवतु । एषां मांसैर्मासत्रयं मे सुखेन गमिष्यति ।

Then be it, Of these with the flesh a month-triad to me pleasantly will pass.

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।

Month one the man goes, two months deer-(and) boar,

अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ १६२ ॥

the serpent one day goes! to-day to be eaten the bow-string. (162)

ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदंडलग्नं स्नायुबंधनं

Then in the first-desire of eating this unsweet to the bow-fastened sinew-string

खादामि । इत्युक्त्वा तथा कृते सति छिन्ने स्नायुबंधन

I eat. Thus having said, thus done being, being cut the sinew-string,

उत्पतितेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पंचत्वमा-

by the up-springing bow in the heart pierced, that Dîrgharâva to the dissolution into the five elements

गतः । अतो ऽहं ब्रवीमि कर्तव्यः संचयो नित्यमित्यादि ।

gone. Therefore I say: 'To be made accumulation constantly,' etc.

तथा च । यद्ददाति यदश्नाति तदेव धनिनो धनं ।

Thus and, What he gives, what he eats, that alone of a rich man the wealth;

अन्ये मृतस्य क्रीडंति दारैरपि धनैरपि ॥ १६३ ॥

others of the dead sport with the wife also, with the riches also. (163)

किंच । यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।

Moreover, What thou givest to the distinguished, what and thou eatest day by day,

तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ १६४ ॥

that of thee the wealth I consider; the rest for somebody else thou preservest. (164)

यातु । किमिदानीमतिक्रांतोपवर्णनेन ।

Let it go. What at present with excessive-description?

यतः । नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुं ।

For, Not the unattainable long after, the lost not wish to bewail,

आपत्स्वपि न मुह्यंति नराः पंडितबुद्धयः ॥ १६५ ॥

in misfortunes even not are perplexed men of wise-intellect. (165)

तत्सखे सर्वदा त्वया सोत्साहेन भवितव्यं ।

Therefore, friend, always by thee full-of energy to be.

यतः । शास्त्राण्यधीत्यापि भवंति मूर्खाः

For, Books having read even they are fools,

यस्तु क्रियावान्पुरुषः स विद्वान् ।

who on the contrary an active man, he wise;

सुचिंतितं चौषधमातुराणां

a well-devised also medicine of the diseased

न नाममात्रेण करोत्यरोगं ॥ १६६ ॥

not by the name-merely effects freedom-from disease. (166)

अन्यच्च । न स्वल्पमप्यध्यवसायभीरोः

Again and, Not a very-small even of the of exertion-afraid

करोति विज्ञानविधिर्गुणं हि ।

produces a wisdom-precept benefit indeed,

अंधस्य किं हस्ततलस्थितो ऽपि

of a blind man (what?) on the palm-standing even

प्रकाशयत्यर्थमिह प्रदीपः ॥ १६७ ॥

does make visible an object here a lamp? (167)

तदत्र सखे दशाविशेषे शांतिः करणीया ।

Then here, O friend, in each special condition tranquillity to be observed.

एतदप्यतिकष्टं त्वया न मंतव्यं ।

This also too-hard by thee not to be considered.

यतः । राजा कुलवधूर्विप्रा मंत्रिणश्च पयोधराः ।

For, 'A king, a noble wife, the wise, ministers likewise, clouds,

स्थानभ्रष्टा न शोभंते दंताः केशा नखा नराः ॥ १६८ ॥

from (their) places-removed not shine, teeth, hairs, nails, men. (168)

इति विज्ञाय मतिमान्स्वस्थानं न परित्यजेत् । कापुरुषवचनमेतत् ।

Thus perceiving a wise man his-place not should abandon,' a weak man's-speech this.

यतः । स्थानमुत्सृज्य गच्छंति सिंहाः सत्पुरुषा गजाः ।

For, (Their) country quitting go lions, brave-men, elephants;

तत्रैव निधनं यांति काकाः कापुरुषा मृगाः ॥ १६९ ॥

there even to death go crows, weak-men, deer. (169)

को वीरस्य मनस्विनः स्वविषयः को वा विदेशस्तथा

What of a brave man, of a wise, his own-country, what or a strange-country likewise?

यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितं ।

to what place he comes, that even does he make through his arms-majesty-acquired.

यद्दंष्ट्रानखलांगुलप्रहरणः सिंहो वनं गाहते

What teeth-claws-tail-(having as) weapons, a lion wood enters,

तस्मिन्नेव हतद्विपेंद्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥ १७० ॥

In that verily with the slain-elephant's-blood the thirst he quenches of himself. (170)

अपरं च । निपानमिव मंडूकाः सरः पूर्णमिवांडजाः ।

Again and, A pool as frogs, a lake full as fishes,

सोद्योगं नरमायांति विवशाः सर्वसंपदः ॥ १७१ ॥

(so) the exerting man approach by themselves all-fortunes. (171)

अन्यच्च । सुखमापतितं सेवेद्दुःखमापतितं तथा ।

Again and, Happiness fallen to one's share one should cherish trouble fallen to one's share likewise,

चक्रवत्परिवर्तंते दुःखानि च सुखानि च ॥ १७२ ॥

wheel-like turn-round troubles and, joys and. (172)

अन्यच्च । उत्साहसंपन्नमदीर्घसूत्रं

Again and, To the exertion-endued, unprocrastinating,

क्रियाविधिज्ञं व्यसनेष्वसक्तं ।

of action-the rules-knowing, to vices not-attached,

शूरं कृतज्ञं दृढसौहृदं च

to a hero, benefits-remembering, one of steady-friendship and,

लक्ष्मीः स्वयं याति निवासहेतोः ॥ १७३ ॥

Lakshmî of her own accord goes for the sake of residing (with him). (173)

विशेषतश्च । विनाप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं
Especially and, Without even riches a hero touches of honour-elevation-a place,

समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः ।
endowed even with riches to of disgrace-a place goes the miser;

स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
the from the inborn-nature springing, for virtue-multitude-acquirement-fit

द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ॥ १७४ ॥
splendour of a lion (what?) a dog bearing-a gold-necklace even obtains? (174)

धनवानिति हि मदो मे किं गतविभवो विषादमुपयामि ।
'Of riches thus truly pride to me; why with departed- sorrow I approach?
possessed,' wealth

करनिहितकंदुकसमाः पातोत्पाता मनुष्याणां ॥ १७५ ॥
the in the hand-placed-ball-like (are) the sinkings-(and)risings of men. (175)

अपरं च । अभ्रच्छाया खलप्रीतिर्नवशस्यानि योषितः ।
Again and, A cloud's-shadow, of wicked-the friendship, new-corn, women,

किंचित्कालोपभोग्यानि यौवनानि धनानि च ॥ १७६ ॥
for some-time-(only) to be enjoyed, youth, riches and. (176)

वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
For the sake of not too much one should that for by the Creator already provided;
a-livelihood strive,

गर्भादुत्पतिते जंतौ मातुः प्रस्रवतः स्तनौ ॥ १७७ ॥
from the womb when comes forth a creature, of the mother stream the breasts. (177)

अपि च सखे । येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
Also and, O friend, By whom white-made the geese, the parrots and green-made,

मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ १७८ ॥
the peacocks variegated by whom, He for thee a livelihood will provide. (178)

अपरं च । सतां रहस्यं शृणु मित्र ।
Again and, Of the good the secret hear, O friend,

जनयंत्यर्जने दुःखं तापयंति विपत्तिषु ।

They produce in the acquisition trouble, they cause pain in failures,

मोहयंति च संपत्तौ कथमर्थाः सुखावहाः ॥ १७९ ॥

they infatuate and in success, how (are) riches happiness-conferring? (179)

अपरं च । धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।

Another and, For religion's-sake of whom wealth-desire, better of him freedom from-desire,

प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं ॥ १८० ॥

than wiping off for of mud far not-touching better. (180)

यतः । यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि ।

For, As truly prey in the air by birds, by beasts on earth

भक्ष्यते सलिले नक्रैस्तथा सर्वत्र वित्तवान् ॥ १८१ ॥

is eaten, in water by crocodiles, thus everywhere the rich man. (181)

राजतः सलिलादग्नेश्चौरतः स्वजनादपि ।

From a king, from water, from fire, from the robber, from their own-people likewise,

भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ १८२ ॥

fear of the rich constantly, from death of the living as. (182)

तथा हि । जन्मनि क्लेशबहुले किं नु दुःखमतः परं ।

Thus for, In life with troubles-abounding what possibly pain than this greater?

इच्छासंपद्यतो नास्ति यच्चेच्छा न निवर्तते ॥ १८३ ॥

desire-fulfilment because not is, because and the desire not ceases? (183)

अन्यच्च भ्रातः शृणु ।

Another and, brother, hear:

धनं तावदसुलभं लब्धं कृच्छ्रेण रक्ष्यते ।

Wealth at first not-easy-to obtained, obtained with difficulty it is preserved,

लब्धनाशो यथा मृत्युस्तस्मादेतन्न चिंतयेत् ॥ १८४ ॥

of the obtained-the loss like death, therefore of this not one should think. (184)

तृष्णां चेह परित्यज्य को दरिद्रः क ईश्वरः ।
Covetousness and here having abandoned, who poor? who a lord?

तस्याश्चेत्प्रसरो दत्तो दास्यं च शिरसि स्थितं ॥ १८५ ॥
of it if way given, servitude and at the head placed. (185)

अपरं च । यद्यदेव हि वांछेत ततो वांछा प्रवर्तते ।
Again and, What what just indeed one may desire, thence the desire starts,

प्राप्त एवार्थतः सोऽर्थो यतो वांछा निवर्तते ॥ १८६ ॥
obtained verily in reality that object, from which the desire turns away. (186)

किं बहुना मम पक्षपातेन । मयैव सहात्र
What with so much of my side of the question? With me just together here

कालो नीयतां ।
the time may be spent.

यतः । आमरणांताः प्रणयाः कोपास्तत्क्षणभंगुराः ।
For, At-death-ending the affections, the anger at that-moment-vanishing,

परित्यागाश्च निःसंगा भवंति हि महात्मनां ॥ १८७ ॥
the gifts and free from-self-interest are truly of the noble-minded. (187)

इति श्रुत्वा लघुपतनको ब्रूते । धन्योऽसि मंथर
Thus having heard Laghupatanaka says: Happy art thou, O Manthara,

सर्वथा श्लाघ्यगुणोऽसि ।
in every way of praiseworthy-virtue thou art.

यतः । संत एव सतां नित्यमापदुद्धरणक्षमाः ।
For, The good only of the good constantly out of misfortune-to lift-able,

गजानां पंकमग्नानां गजा एव धुरंधराः ॥ १८८ ॥
of elephants into a mire-plunged elephants only the burthen-bearers (rescuers). (188)

श्लाघ्यः स एको भुवि मानवानां
To be praised that alone on earth of men,

स उत्तमः सत्पुरुषः स धन्यः ।
he the greatest, a good man, he happy,

यस्यार्थिनो वा शरणागता वा
of whom the needy either, the refuge-taking or,

नाशाविभंगा विमुखाः प्रयांति ॥ १८९ ॥
not broken-hoped with averted-faces go away. (189)

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः संतुष्टाः
Then thus those according to their-desire-feeding-(and)sporting making contented

सुखं निवसंति । अथ कदाचिच्चित्रांगनामा मृगः केनापि त्रासि-
happily dwell. Now one-day Chitrânga-named a deer by somebody frightened

तस्तत्रागत्य मिलितः । ततः पश्चादायांतं मृगमवलोक्य भयं
there having approached was met. Thence after approaching the deer having seen, danger

संचिंत्य मंथरो जलं प्रविष्टो मूषिकश्च विवरं गतः काको
suspecting, Manthara the water entered, the mouse and to the hole went, the crow

ऽप्युड्डीय वृक्षमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य
also up-flying a tree ascended. Then by Laghupatanaka, very-far having looked,

भयहेतुर्न कोऽप्यायातीत्यालोचितं । पश्चात्तद्वचना-
fear-cause not any approaches' thus was considered. Afterwards upon his word

दागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः । मंथरेणोक्तं । भद्र
having arrived again all having met there just seated. By Manthara said: Hail!

मृग स्वागतं । स्वेच्छयोदकाद्याहारो ऽनुभूयतां ।
deer, welcome! According to your-wish, of water-etc. consisting-food may be enjoyed.

अत्रावस्थानेन वनमिदं सनाथीक्रियतां । चित्रांगो ब्रूते ।
By here residing forest this with a lord-may be endowed. Chitrânga says:

लुब्धकत्रासितो ऽहं भवतां शरणमागतः । भवद्भिः सह
By a hunter-frightened I of you the protection approached. You with

सख्यमिच्छामि । हिरण्यको ऽवदत् । मित्रत्वं तावदस्माभिः सह भवता-
friendship I wish. Hiranyaka said: Friendship truly us with by you

यत्नेन मिलितं ।
without-trouble met.

यतः । औरसं कृतसंबंधं तथा वंशक्रमागतं ।
For, One's own offspring, one formed by connection, likewise one in race-line-descended;

रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधं ॥ १९० ॥
one rescued from dangers and, a friend to be known of four-kinds. (190)

तदत्र भवता स्वगृहनिर्विशेषं स्थीयतां ।
Therefore here by you from your own-house-without a difference may be remained.

तच्छ्रुत्वा मृगः सानंदो भूत्वा स्वेच्छाहारं
That having heard the deer, full of-joy being, according to his-desire-feeding

कृत्वा पानीयं पीत्वा जलासन्नवृक्षच्छायायामुपविष्टः । अथ
making, water drinking, in a water-near standing-tree's-shade settled. Then,

मंथरेणोक्तं । सखे मृग एतस्मिन्निर्जने वने केन त्रासितो
by Manthara said: Friend deer, in this lonely forest by whom frightened

ऽसि । कदाचित्किं व्याधाः संचरंति । मृगेणोक्तं । अस्ति
art thou? Ever (do) hunters walk about? By the deer said: There is

कलिंगविषये रुक्मांगदो नाम नरपतिः । स च दिग्विज-
in the Kalinga-country Rukmângada by name a prince. He and by the world-

यव्यापारक्रमेणागत्य चंद्रभागानदीतीरे समावा-
conquest-business-course having approached, on the Chandrabhâgâ-bank having

सितकटको वर्तते । प्रातश्च तेनात्रागत्य
pitched-his camp resides. 'In the morning and, he here having arrived

कर्पूरसरःसमीपे भवितव्यमिति व्याधानां मुखात्किंवदंती
in the Karpûra-lake-proximity will be,' thus of the hunters from the mouth a report

श्रूयते। तदत्रापि प्रातरवस्थानं भयहेतुकमित्या-

is heard. Therefore here also in the morning residing (is) fear-cause having, thus

लोच्य यथावसरकार्यमारभ्यतां। तच्छ्रुत्वा

considering according to-the occasion-action may be undertaken. That having heard

कूर्मः सभयमाह। जलाशयांतरं गच्छामि। काक-

the tortoise with-fear says: To another-water-reservoir I go. The crow-

मृगावप्युक्तवंतौ। एवमस्तु। ततो हिरण्यको विहस्याह।

(and)-mouse also said: So be it. Then Hiranyaka smiling said:

जलाशयांतरे प्राप्ते मंथरस्य कुशलं स्थले गच्छतः

Another-water-reservoir being reached, of Manthara welfare; on the land of the going

कः प्रतीकारः।

what help?

यतः। अंभांसि जलजंतूनां दुर्गं दुर्गनिवासिनां।

For, Water of water-animals, a fort of the in the fort-residing,

स्वभूमिः श्वापदादीनां राज्ञां मंत्री परं बलं ॥ १९१ ॥

their own-place of beasts, etc., of kings a minister the chief strength. (191)

सखे लघुपतनक अनेनोपदेशेन तथा भवितव्यं

Friend Laghupatanaka, through this advice thus to be fared:

स्वयं वीक्ष्य यथा वध्वाः पीडितं कुचकुड्मलं।

Himself having seen as of his wife pressed the bosom-bud,

वणिक्पुत्रोऽभवद्दुःखी त्वं तथैव भविष्यसि ॥ १९२ ॥

the merchant's-son became sad; thou thus just wilt be. (192)

त ऊचुः। कथमेतत्। हिरण्यकः कथयति। अस्ति कान्यकुब्ज-

They said: 'How that?' Hiranyaka relates: There is in the Kânyakubja-

विषये वीरसेनो नाम राजा। तेन वीरपुरनाम्नि नगरे

country Vîrasena by name a king. By him in the Vîrapura-named town

तुंगबलो नाम राजपुत्रो भोगपतिः कृतः । स च महाधनस्तु-
Tuñgabala by name a prince governor appointed. He and of great-wealth,

रुण एकदा स्वनगरे भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं
young, one-day in his-town perambulating in full-blown youth Lâvaṇyavatî

नाम वणिक्पुत्रवधूमालोकयामास । ततः स्वहर्म्यं गत्वा स्मरा-
by name a merchant's-son's-wife saw. Then to his-palace having gone by love-

कुलमतिस्तस्याः कृते दूतीं प्रेषितवान् ।
disturbed-in mind on her account a female messenger he dispatched.

यतः सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेंद्रियाणां
For, On the right-path so long he remains, master is a man so long only of the senses,

लज्जां तावद्विधत्ते विनयमपि समालंबते तावदेव ।
shame so long he has, decency also he maintains so long only,—

भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
by the eyebrows-bow-drawn back-(and) darted, to the ear-reaching, black-feathered those

यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतंति ॥ १९३ ॥
as of fair-ones not into the heart the steadiness-stealing look-arrows fall. (193)

सापि लावण्यवती तदवलोकनक्षणात्प्रभृति स्मरशरप्रहारजर्ज-
She also Lâvaṇyavatî him-seeing-the moment from by the Love-arrow-stroke-

रितहृदया तदेकचित्ताभवत् ।
broken-hearted of him-alone-thinking was.

तथा ह्युक्तं । असत्यं साहसं माया मात्सर्यं चातिलुब्धता ।
Thus for said, Untruth, violence, fraud, envy and extreme-covetousness,

निर्गुणत्वमशौचत्वं स्त्रीणां दोषाः स्वभावजाः ॥ १९४ ॥
want-of virtue, impurity, of women the faults from their-nature-springing. (194)

अथ दूतीवचनं श्रुत्वा लावण्यवत्युवाच । अहं पतिव्रता
Now the messenger's-word having heard Lâvaṇyavatî said: I husband-devoted

कथमेतस्मिन्नधर्मे पतिलंघने प्रवर्ते ।
how in this unrighteousness, husband-imposition, I engage?

यतः । सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
For, She a wife, who in the house clever; she a wife who prolific,

सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ १९५ ॥
she a wife whose husband-is her life, she a wife who husband-devoted. (195)

न सा भार्येति वक्तव्या यस्या भर्ता न तुष्यति ।
Not she 'a wife' thus to be called, with whose husband not is gratified,

तुष्टे भर्तरि नारीणां संतुष्टाः सर्वदेवताः ॥ १९६ ॥
being gratified the husband of women, gratified all-divinities. (196)

ततो यद्यदादिशति मे प्राणेश्वरस्तदेवाहमविचारितं
therefore whatever commands of me the life-lord, that only I without-examination

करोमि । दूत्योक्तं । सत्यतममेतत् । लावण्यवत्युवाच । ध्रुवं
do. By the messenger said: Quite true this? Lâvanyavatî said: Certainly,

सत्यमेतत् । ततो दूतिकया गत्वा तत्तत्सर्वं तुंगबलस्याग्रे
true this. Then by the messenger having gone that that all of Tuṅgabala in the presence

निवेदितं । तच्छ्रुत्वा तुंगबलोऽब्रवीत् । स्वामिनानीय
reported. That having heard Tuṅgabala said: 'By the husband, having led (her) near,

समर्पयितव्येति कथमेतच्छक्यं । कुट्टन्याह । उपायः क्रियतां ।
she is to be surrendered,' how this possible? The procuress said: A stratagem be made.

तथा चोक्तं । उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
Thus and said, By a stratagem truly what possible, not that possible by valour,

शृगालेन हतो हस्ती गच्छता पंकवर्त्मना ॥ १९७ ॥
by a jackal slain an elephant, going on a swamp-way. (197)

राजपुत्रः पृच्छति । कथमेतत् । सा कथयति । अस्ति ब्रह्मारण्ये
The prince asks: How that? She relates: There is in the Brahma-wood

कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिंतयंति स्म ।
Karpûratilaka by name an elephant. Him having seen all the jackals thought:

यद्ययं केनाप्युपायेन म्रियते तदास्माकमेतद्देहेन मासचतुष्टयस्य
If he by some stratagem dies, then of us through his-body of a month-tetrad

भोजनं भविष्यति । तत्रैकेन वृद्धशृगालेन प्रतिज्ञातं । मया बुद्धि-
food will be. There by one old-jackal promised: By me through-intellect-

प्रभावादस्य मरणं साधयितव्यं । अनंतरं स वंचकः
superiority of him the death to be accomplished: Thereupon that cheat

कर्पूरतिलकसमीपं गत्वा साष्टांगपातं प्रणम्यो-
Karpûratilaka-near having gone with-of the eight-limbs-prostration having saluted

वाच । देव दृष्टिप्रसादं कुरु । हस्ती ब्रूते । कस्त्वं कुतः
said: Sire, look-favour make. The elephant says: Who thou, whence

समायातः । सो ऽवदत् । जंबुको ऽहं सर्ववनवासिभिः पशुभिर्मि-
approached? He said: A jackal I by all wood-inhabiting animals,

लित्वा भवत्सकाशं प्रस्थापितः । यद्विना राज्ञावस्थातुं
after having met, to your-presence despatched. Because without a king to remain

न युक्तं तदत्राटवीराज्ये ऽभिषेक्तुं भवान्
not proper, therefore here in the forest-sovereignty to be inaugurated you

सर्वस्वामिगुणोपेतो निरूपितः ।
with all-lord's-virtues-endowed selected.

यतः । यः कुलाभिजनाचारैरतिशुद्धः प्रतापवान् ।
For, Who by race-descent- (and) conduct very-pure, majestic,

धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ १९८ ॥
just, behaviour-clever, he as a master is fit on earth. (198)

अपरं च पश्य । राजानं प्रथमं विंदेत्ततो भार्यां ततो धनं ।
Another and see, A king first he should find, then a wife, then riches,

राजन्यसति लोके ऽस्मिन्कुतो भार्या कुतो धनं ॥ १९९ ॥
king not-being in this world, whence a wife, whence riches? (199)

अन्यच्च । पर्जन्य इव भूतानामाधारः पृथिवीपतिः ।
Again said, Cloud-like of the living a support an earth-lord,

विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ २०० ॥
failing also for a cloud it is lived, not but an earth-lord (failing). (200)

नियताविषयवर्ती प्रायशो दंडयोगात्
In the allotted-office-remaining generally through the rod-use

जगति परवशेऽस्मिन्दुर्लभः साधुवृत्तः ।
in the world on another-dependent this; difficult-to be found one of good-character;

कृशमपि विकलं वा व्याधितं वाधनं वा
a meagre also defective or sick or, poor or

पतिमपि कुलनारी दंडभीत्याभ्युपैति ॥ २०१ ॥
husband also a noble woman through the rod-fear approaches. (201)

तद्यथा लग्नवेला न विचलति तथा कृत्वा सत्वरमा-
Therefore that the lucky-moment not passes away, thus acting, with-haste

गम्यतां देवेन । इत्युक्तोत्थाय चलितः । ततो
may be approached by your highness. Thus having spoken, rising (he) went. Then

ऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना
that by the sovereignty-desire-attracted Karpúratilaka on the jackal's-way

धावन्महापंके निमग्नः । ततस्तेन हस्तिनोक्तं । सखे शृगाल
running in a great-mire immersed. Then by that elephant said: Friend jackal,

किमधुना विधेयं । पंके निपतितोऽहं । म्रिये । परावृत्य पश्य ।
what now to be done? in a mire fallen I; I die; turning back look!

शृगालेन विहस्योक्तं । देव मम पुच्छकावलंबनं कृत्वोत्तिष्ठ । यद्
By the jackal smiling said: Sire, of me tail-holding having made rise. Because

मद्विधस्य वचसि त्वया प्रत्ययः कृतस्तदनुभूयतामशरणं दुःखं ।
of me-like in word by thee confidence placed, therefore may be suffered helpless pain.

तथा चोक्तं । यदा सत्संगरहितो भविष्यसि भविष्यसि ।
Thus and said: If of the good-society-deprived thou wilt be, thou wilt be,

तदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ २०२ ॥
then into bad-men's-companies thou wilt fall, thou wilt fall. (202)

ततो महापंके निमग्नो हस्ती शृगालैर्भक्षितः । अतो
Then into the great-mire plunged the elephant by the jackals eaten. [illegible]

ऽहं ब्रवीमि । उपायेन हि यच्छक्यमित्यादि । ततः कुट्टन्युपदे-
I say: By a stratagem truly what possible, etc. Then by the procuress's

शेन तं चारुदत्तनामानं वणिक्पुत्रं स राजपुत्रः सेवकं
advice that Chárudatta-named merchant's-son that prince (his) attendant

चकार । ततो ऽसौ तेन सर्वविश्वासकार्येषु नियोजितः । एकदा
made. Then he by him in all-confidence-affairs (was) employed. One day

तेन राजपुत्रेण स्नातानुलिप्तेन कनकरत्नालंकारधारिणा प्रोक्तं ।
by that prince bathed-(and) anointed gold-jewel-ornaments-bearing announced:

अद्यारभ्य मासमेकं गौरीव्रतं कर्तव्यं । तदत्र
To-day beginning for month one the Gaurí-vow to be performed. Therefore hither

प्रतिरात्रमेकां कुलीनां युवतीमानीय समर्पय । सा मया
every-night one noble virgin having led surrender (her). She by me

यथोचितेन विधिना पूजयितव्या । ततः स चारुदत्तस्तथाविधां
in the usual manner to be honoured. Then that Chárudatta such a one

नवयुवतीमानीय समर्पयति । पश्चात्प्रच्छन्नः सन्किमयं
quite-young having led near surrenders. Afterwards concealed being, 'what he

करोतीति निरूपयति । स च तुंगबलस्तां युवतीमस्पृशन्नेव
does?' thus espies. That and Tungabala that maiden not-touching even

दूराद्वस्त्रालंकारगंधचंदनैः संपूज्य रक्षकं
from afar with garments-ornaments-perfumes-sandal wood having honoured, a guardian

दत्त्वा प्रस्थापयति । अथ वणिक्पुत्रेण तद्दृष्ट्वोपजातविश्वासेन
having given, sends away. Now by the merchant's-son, that having-seen, with increased-confidence,

लोभाकृष्टमनसा स्ववधूं लावण्यवतीं समानीय
with by covetousness-attracted-mind, his-wife Lâvaṇyavatî having led near

समर्पिता । स च तुंगबलस्तां हृदयप्रियां लावण्यवतीं
(she was) surrendered. He and Tuṅgabala that heart-beloved Lâvaṇyavatî

विज्ञाय ससंभ्रममुत्थाय निर्भरमालिंग्य निमीलिताक्षः
having recognised, with-haste up-jumping, ardently embracing, with half-closed-eyes,

पर्यंके तया सह विलसति । तदालोक्य वणिक्पुत्रश्चित्रलिखित इवे-
on a sofa her - with sported. That seeing the merchant's-son picture - like

तिकर्तव्यतामूढः परं विषादमुपगतः । अतोऽहं ब्रवीमि । स्वयं
perplexed-what to do- to extreme sadness went. Therefore I say: Himself

वीक्ष्येत्यादि । तथा त्वयापि भवितव्यमिति । तद्धितवचनम-
having seen, etc. Thus by thee also will be fared. That friend's-word not

नवधीर्य महता भयेन विमुग्ध इव तं जलाशयमुत्सृज्य
regarding with great fear perplexed as it were that water-reservoir having left

मंथरश्चलितः । तेऽपि हिरण्यकादयः स्नेहादनिष्टं
Manthara went. They also Hiraṇyaka, etc. from affection, (something) unwished

शंकमाना मंथरमनुगच्छंति । ततः स्थले गच्छन्केनापि व्याधेन
apprehending Manthara follow. Then on the land going by some hunter,

काननं पर्यटता मंथरः प्राप्तः । प्राप्य तं गृहीत्वो-
the forest perambulating, Manthara caught. Having caught him, having seized,

त्थाप्य धनुषि बद्धा भ्रमन्क्लेशात्क्षुत्पिपासाकुलः
having lifted, to the bow having bound, walking about, through fatigue by hunger-(and) thirst-troubled

स्वगृहाभिमुखं चलितः । अथ मृगवायसमूषिकाः परं विषादं
towards-his-house (he) went. Now the deer-crow-mouse to extreme grief

गच्छंतस्तमनुजग्मुः । ततो हिरण्यको विलपति ।
coming him followed. Then Hiranyaka laments:

एकस्य दुःखस्य न यावदंतं गच्छाम्यहं पारमिवार्णवस्य ।
Of one trouble not while to the end go I, to the shore as of the ocean,

तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवंति ॥ २०३ ॥
then a second approached to me, in damages the evils are multiplied. (203)

स्वाभाविकं तु यन्मित्रं भाग्येनैवाभिजायते ।
By his inborn-nature but who a friend, by fortune only he is produced,

तदकृत्रिमसौहार्दमापत्स्वपि न मुंचति ॥ २०४ ॥
therefore one of unfeigned-friendship in misfortunes also not does one give up. (204)

न मातरि न दारेषु न सोदर्ये न चात्मजे ।
Not in a mother, not in a wife, not in a brother, not and in one's own-offspring,

विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे ॥ २०५ ॥
confidence such of men, as in a friend by his inborn-nature-become (one). (205)

इति मुहुर्विचिंत्याहो दुर्दैवं ।
Thus repeatedly having thought (he cried out): Oh, the hard-fate!

यतः । स्वकर्मसंतानविचेष्टितानि
For, The by one's own-actions'-spreading-wrought

कालांतरावर्तिशुभाशुभानि ।
at other times-reverting-good-(and) evil,

इहैव दृष्टानि मयैव तानि
(are) here already experienced by me at least those,

जन्मांतराणीव दशांतराणि ॥ २०६ ॥
like different-births, different conditions. (206)

अथवेत्थमेवैतत् । कायः संनिहितापायः संपदः पदमापदां ।
Or, thus verily this, . The body has destruction-close to it, happiness the place for misfortunes,

समागमाः सापगमाः सर्वमुत्पादि भंगुरं ॥ २०७ ॥
meeting with-departure connected, everything born (is) frail. (207)

पुनर्विमृश्याह । शोकारातिभयत्राणं प्रीतिविश्रंभभाजनं ।
Again having reflected he says: From sorrow-enemies- (and) danger-a protection of affection (and) confidence-a vessel,

केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयं ॥ २०८ ॥
by whom jewel this created, '*Mitra*' thus the syllable-couple? (208)

किंच । मित्रं प्रीतिरसायनं नयनयोरानंदनं चेतसः
Moreover: A friend, a pleasure-elixir of the eyes, a delight of the mind,

पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभं ।
a vessel that in happiness-(and) trouble together might be with the friend, that hard-to find;

ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलाः
And what other friends in success-time, with wealth-desire-filled,

ते सर्वत्र मिलंति तत्त्वनिकषग्रावा तु तेषां विपत् ॥ २०९ ॥
they everywhere meet (us); but the truth-touch stone of them (is) adversity. (209)

इति बहु विलप्य हिरण्यकश्चित्रांगलघुपतनकावाह । यावदयं
Thus much having lamented Hiranyaka to Chitrâṅga-(and) Laghup. says: So long as this

व्याधो वनान्न निःसरति तावन्मंथरं मोचयितुं
hunter from the forest not goes away, so long Manthara to rescue

यत्नः क्रियतां । तावूचतुः । सत्वरं कार्यमुच्यतां ।
an effort may be made. They both said: With-haste what to be done may be told.

हिरण्यको ब्रूते । चित्रांगो जलसमीपं गत्वा मृतमिवात्मानं
Hiranyaka says: Chitrâṅga to the water-near having gone dead-like himself

दर्शयतु काकश्च तस्योपरि स्थित्वा चंच्वा किमपि विलिखतु ।
may show, the crow and over him standing with the beak somewhat may peck.

नूनमनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना
Now by that hunter there, the tortoise having left, for the deer's-flesh-desirous,

त्वरं गंतव्यं । ततोऽहं मंथरस्य बंधनं छेत्स्यामि संनिहिते
with-haste will be gone. Then I of Manthara the tie shall cut; having approached

लुब्धके भवद्भ्यां पलायितव्यं । चित्रांगलघुपतनकाभ्यां शीघ्रं
the hunter, by you to be fled. By Chitrânga- (and) Laghupatanaka, quickly

गत्वा तथानुष्ठिते सति स व्याधः श्रांतः पानीयं पीत्वा
having gone, thus accomplished being, that hunter, tired, water having drunk,

तरोरधस्तादुपविष्टस्तथाविधं मृगमपश्यत् । ततः कर्तरिकामादाय
under a tree seated in such a condition the deer saw. Then the knife having taken,

प्रहृष्टमना मृगांतिकं चलितः । तत्रांतरे हिरण्यके-
with rejoicing-mind near to the deer proceeded. There meanwhile by Hiranyaka

नागत्य मंथरस्य बंधनं छिन्नं । स कूर्मः सत्वरं
having approached, of Manthara the tie cut. That tortoise with-haste

जलाशयं प्रविवेश । स मृग आसन्नं तं व्याधं विलोक्योत्थाय
the water-reservoir entered. That deer near that hunter perceiving, rising,

पलायितः । प्रत्यावृत्य लुब्धको यावत्तरुतलमायाति तावत्कूर्मम-
escaped. Returning the hunter while the tree-foot he approaches, then the tortoise

पश्यन्नचिंतयत् । उचितमेवैतन्ममासमीक्ष्यकारिणः ।
not-seeing, reflected: Proper only this for me, not-circumspectly-acting.

यतः । यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
For, He who certain (things) forsaking uncertain (things) attends to,

ध्रुवाणि तस्य नश्यंति अध्रुवं नष्टमेव हि ॥ २१० ॥
the certain (things) of him perish, the uncertain is perished already. (210)

ततोऽसौ स्वकर्मवशान्निराशः कटकं प्रविष्टः । मंथरादयः
Then he through-his own-action disappointed the camp entered. Manthara, etc.

सर्वे त्यक्तापदः स्वस्थानं गत्वा यथासुखमास्थिताः ॥
all freed-from misfortune to their-place having gone happily remained.

अथ राजपुत्रैः सानंदमुक्तं । सर्वं श्रुतवंतः सुखिनो वयं ।
Then by the princes with-joy said: All having heard pleased we.

सिद्धं नः समीहितं । विष्णुशर्मोवाच । एतावता भवताम-
Accomplished of us what (was) desired. Vishṇuśarman said: With so much of you

भिलषितं संपन्नं । अपरमपीदमस्तु ।
the desire fulfilled, further also this may be:

मित्रं प्राप्नुत सज्जना जनपदैर्लक्ष्मीः समालंबतां
A friend acquire ye, O, good-men; with the nations Lakshmî may dwell;

भूपालाः परिपालयंतु वसुधां शश्वत्स्वधर्मे स्थिताः ।
Princes may protect the earth, constantly in their-duty standing;

आस्तां मानसतुष्टये सुकृतिनां नीतिर्नवोढेव वः
it may remain for the mind-gratification of the virtuous Nîti, a new-bride-like, of you;

कल्याणं कुरुतां जनस्य भगवांश्चंद्रार्धचूडामणिः ॥ २११ ॥
prosperity may cause of the people the venerable, who has the moon's-half-for his crest-jewel. (211)

॥ इति हितोपदेशे मित्रलाभो नाम प्रथमकथासंग्रहः समाप्तः ॥
Thus in the Hitopadeśa, Friend-acquisition by name the first-story-collection finished.

ASIATIC SOCIETY OF BOMBAY

LONDON
PRINTED BY SPOTTISWOODE AND CO.
NEW-STREET SQUARE

00004606

Digitized with financial assistance from the
Government of Maharashtra
on 07 April, 2016